तीर्थे विष्णुपदे रम्ये विष्णुलोकफलप्रदे ॥ ५ ॥
चतुर्विंशद्द्वादशीषु स्नाति यो नियमैर्नरः ।
मानुषं विभवं भुक्त्वा विष्णुलोकं स गच्छति ॥६
दूरादपि विनिर्दिष्टा फेनप्रस्यन्दवाहिनी ।
विष्णोः पदात्स्रवन्तीति तस्माद्विष्णुपदी स्मृता७
वाग्वत्या विष्णुपद्याश्च सम्भेदे सत्त्वसेविते ।
स्नायते विधिना यस्तु सौभाग्यं लभते नरः ॥८
गङ्गा च यमुना चैव तथा देवी सरस्वती ।
तत्र गच्छन्ति पञ्चम्यां तस्मात्पञ्चनदी स्मृता ॥९

करेंगे ॥ ३–४॥ विष्णुलोक का फल देने वाले विष्णुपद नामक रमणीय तीर्थ में १२ मासों तक २४ एकादशियों में जो मनुष्य नियम पूर्वक स्नान करता है, वह मनुष्य लोक के वैभव को भोग कर विष्णु लोक को प्राप्त होता है ॥ ५–६ ॥ जो दूर से भी स्पष्ट दिखाई देती हुई फेन का प्रवाह वहाने वाली विष्णुके पदसे निकलती है, इस लिए वह विष्णुपदी (विष्णुमती) कही गई है ॥ ७॥ वाग्वती तथा विष्णुपदी के सात्त्विक प्राणियों से सेवित सङ्गम में जो मनुष्य विधि पूर्वक स्नान करता है वह सौभाग्य प्राप्त करता है ॥ ८॥ गङ्गा यमुना

अथातः सम्प्रवक्ष्यामि दर्यान्तस्यैव भूभृतः ।
इन्द्रमार्गमिति ख्यातं तीर्थमिन्द्रेण कल्पितम् १०
अस्मिंस्तीर्थवरे पुण्ये विधिना स्नायते तु यः ।
मोदते चाप्सरोभिश्च परत्र स्वस्तिकामुकः ॥११
दिव्याप्सरोभिः संसेव्या फेनालिनिकरोज्ज्वला ।
इन्द्रमार्गात्स्रवन्तीति चेन्द्रमार्गेति विश्रुता ॥१२
वाग्वत्या इन्द्रमार्गायाः सम्भेदे सत्त्वसेविते ।
स्नायते विधिना योयमिन्द्रलोकं स गच्छति १३
ततो मणिमती नाम सरिद्रुद्रशिरोभवा ।

तथा देवी सरस्वती ये तीनों नदियाँ पञ्चमी तिथि में वहा जाती हैं। इसी लिए उस दिन उसका नाम पञ्चनदी होता है ॥९॥ अव यहाँ से उसी मृगेन्द्रशिखर की गुहा पर इन्द्र के वनाये हुए इन्द्रमार्ग नाम से प्रख्यात तीर्थ का वर्णन करेंगे ॥१०॥ इस श्रेष्ठ तथा पुण्य तीर्थ में जो कल्याणकांक्षी मनुष्य विधिपूर्वक स्नान करता है, वह परलोक में अप्सराओं के साथ रमता है ॥ ११ ॥ जो दिव्य अप्सराओं से सेवनीय फेन की पङ्क्तियों की मालाओंसे उज्ज्वला और इन्द्रमार्गसे वहती है, इस से वह इन्द्रमार्गा कहीजाती है ॥१२॥ वाग्वती और इन्द्रमार्गा के सत्त्वसेवित सङ्गम पर जो विधि से स्नान करता है, वह इन्द्रलोक जाता है ॥१३॥ इस के अनन्तर रुद्र के शिर

तस्याश्च प्रभवं तीर्थं प्रवक्ष्यामि प्रकामदम् ॥१४
मणिधातुनगोत्सङ्गे तीर्थे मणिशिलान्तरे ।
स्नायते विधिना यस्तु कामसिद्धिमवाप्नुयात् १५
मणिना कल्पितं लिङ्गं मणिलिङ्गमिति स्मृतम् ।
चूडामणेः स्रवन्तीति तस्मान्मणिमती स्मृता १६
वाग्वत्या मणिमत्याश्च सङ्गमे सत्त्वसेविते ।
स्नायते विधिना यस्तु सर्वकाममवाप्नुयात् ॥१७
सम्भेदेऽस्यास्तदभ्याशे स्रोतस्यूर्ध्वं विनिस्सृते ।
रुद्रधाराजलं नाम तीर्थमस्ति प्रकामदम् ॥ १८॥

से उत्पन्न हुई मणिमती (मनोहरा) नाम की नदी के कामानुकूल फलदायक प्रभव तीर्थ का वर्णन करेंगे ॥१४॥ मणिधातु नामक पर्वत की गोद में मणिशिला नामक तीर्थ पर जो स्नान करता है, वह कामनासिद्धि प्राप्त करता है ॥ १५॥ मणि से वनाये लिङ्ग को मणिलिङ्ग कहते हैं उसके चूडामणि से वहती है, इसलिए इसको मणिमती कहाहै ॥ १६॥ सत्त्वसेवित वाग्वती और मणिमती के सङ्गम में जो विधि से स्नान करता है, वह समस्त कामनाओं का फल पाता है ॥ १७॥ इस के सङ्गमतीर्थ के पास ऊर्ध्वगामी स्रोत में रुद्रधाराजल नामक उत्कृष्ट कामनादायी तीर्थ है ॥ १८॥ मनुष्य

स्फटिकाक्षावलीतुल्यजलबुद्बुदमालिनम् ।
रुद्रधारोदयं दृष्ट्वा सर्वपापैर्विमुच्यते ॥ १९॥
अस्मिंस्तीर्थवरे पुण्ये विधिना स्नायते तु यः ।
विमानेनार्कवर्णेन रुद्रलोकं स गच्छति ॥ २० ॥
कृष्णाष्टम्यां चतुर्दश्यां पञ्चदश्यां विशेषतः ।
स्नातव्यं विधिना नित्यं रुद्रलोकफलार्थिभिः २१
सुतो विश्रवसः श्रीमान् राक्षसोऽथ बिभीषणः ।
स्वपितुः शासनात्तत्र तप उग्रं चकार ह ॥ २२ ॥

भीष्म उवाच—

धर्मशीलेन धीरेण पितुः शासनवर्त्तिना ।

स्फटिक माला के तुल्य जल के बुलबुलों की माला वाले रुद्रधारोदय तीर्थ को देख कर सर्व पापों से मुक्त होता है ॥ १९ ॥ इस उत्तम पुण्यतीर्थ में विधि से जो स्नान करता है वह सूर्य तुल्य विमान में वैठकर रुद्रलोक को जाता है ॥ २० ॥ रुद्रलोक का फल चाहने वाले लोगोंको विशेष कर हर एक कृष्णाष्टमी चतुर्दशी अमावास्या पूर्णिमा के दिन विधिसे स्नान करना चाहिए ॥ २१ ॥ विश्रवाका पुत्र श्रीमान् राक्षस कुलभूषण बिभीषणने अपने पिता की आज्ञासे वहाँ पर उग्र तप किया था ॥ २२ ॥ भीष्म बोले— हे महर्षि ! पिताका आज्ञाकारी धर्मशील धीर बिभीषण ने किस

कस्योपदेशाद्देवर्षे ! तपस्तस्मिन्ननुष्ठितम् ॥२३॥

पुलस्त्य उवाच

पुरा लङ्कापुरीं त्यक्त्वा धर्मशीलो बिभीषणः।
गोकर्णारण्यकं रम्यं प्राप्तवान् पितुरालयम् २४
प्राप्तमात्रस्तु धर्मज्ञो ज्वलन्तं तपसः श्रिया ।
प्रणम्य पितरं मूर्ध्ना निषसाद कुशासने ॥२५॥
ततश्चित्तगतं ज्ञात्वा पुत्रस्याक्लिष्टकर्मणः ।
व्याजहार शुभं वाक्यं विश्रवा मुनिपुङ्गवः ॥२६॥

विश्रवा उवाच --

ज्ञातं वै तव धर्मज्ञ यतः कार्यादिहागतः ।
विना न तपसा पुत्र सिध्यन्ते कार्यसम्पदः २७

के उपदेश से उस तीर्थ में तपका अनुष्ठान किया ॥२३॥ पुलस्त्य बोले—प्राचीन समय में धर्मशील बिभीषण लङ्कापुरी को त्यागकर रमणीय गोकर्णारण्य में पिता के आश्रम पर आये ॥२४॥ आते ही धर्मज्ञ बिभीषण ने तपस्या की शोभा से शोभमान पिताको शिरसे प्रणाम कर कुशाके आसन पर बैठ गये ॥२५॥ उसके अनन्तर शुभकर्मकारी पुत्रके चित्तकी बातको जानकर मुनिश्रेष्ठ विश्रवाने शुभ वचनोंसे कहा ॥२६॥ हे धर्मज्ञ ! तुम्हारे यहाँ आनेका कारण जान लिया हे पुत्र ! विना तपस्या किये कार्यसम्पत्ति की सिद्धि नहीं होती है ॥२७॥

रम्ये हिमवतः कुक्षौ सुरसिद्धनिषेविते ।
महादेव मुखोद्भूता वाग्वती सरिदुत्तमा ॥२८॥
रम्या मणिमती चैव चूडामणिसमुद्भवा ।
तयोस्तु सङ्गमाभ्याशे स्रोतस्यूर्ध्वंविनिस्सृतम् २९
रुद्रधाराजलं पुण्यं तीर्थमस्ति प्रकामदम् ।
जलं पातालगङ्गाया रुद्रपादार्घनिस्सृतम् ॥३०॥
पवित्रं परमं तीर्थं सर्वकामफलप्रदम् ।
उग्रं तपस्तत्र गत्वा क्रियतां नियमेन वै ॥ ३१ ॥
विनिगृह्येन्द्रियग्रामं मन्त्रजापपरो भव ।
ततस्तस्य वचः श्रुत्वा पितुर्धर्मभृतां वरः ॥३२॥

इसलिए हिमवान् के रमणीय कुक्षिमें सिद्ध देवता आदि जहाँ रहते हैं, वहाँ पर महादेव के मुख से उत्पन्न उत्तम नदी वाग्वती है ॥२८॥ एवं चूडामणि से उत्पन्न हुई रमणीय मणिमती है । इन दोनों नदियों के समागम के पास प्रवाह में उपरको निकली हुई रुद्रधारा, कामानुकूल फल दायक पुण्य तीर्थ है । पातालगङ्गा का जल रुद्र के पादार्घ से निकला है॥ २९–३० ॥ यह समस्त कामनाओं का फल देने वाला परम पवित्र तीर्थ है । वहाँ जाकर यम नियम पूर्वक उग्र तपस्या करो ॥ ३१ ॥ इन्द्रिय ग्रामका निग्रह कर मन्त्रजप में तत्पर हो जाओ ।

प्रययौ जवमास्थाय हिमवन्तं विभीषणः ।
प्राप्तमात्रेण धर्मज्ञो रुद्रधारोदयं शुभम् ॥३३॥
निमज्य वाग्वतीतोये चकारोग्रतरं तपः ।
दिनान्तरेण केनापि कीर्तिमान् पुण्यवत्सलः ३४
आगत्य विश्रवास्तत्र प्रावदत्साधु साध्विति ।
पुत्रं जले स्थितं दृष्ट्वा वेपमानं मुहुर्मुहुः ॥३५॥

विश्रवा उवाच—

व्याजहार शुभं वाक्यं विश्रवा मुनिपुङ्गवः ।
एह्येहि पुत्र धर्मज्ञ सिद्धं कार्यं त्वदीहितम् ॥३६॥

उसके अनन्तर पिताका वचन सुनकर धर्म धारियोंमें श्रेष्ठ विभीषण वेगसे हिमवान की ओर चला, धर्मज्ञने शुभ रुद्र धारोदय में पहुँचते ही ॥ ३२-३३॥ वाग्वती के जलमें स्नान कर उग्रतर तप करने लगा। तत्पश्चात कुछ दिनोंमें पुण्यवत्सल कीर्तिमान् विश्रवा मुनिने आकर पुत्रको जलमें वैठ वार वार कापते देखकर 'साधु साधु' इस प्रकार धन्यवाद दिया ॥ ३४-३५॥ हे धर्मज्ञ पुत्र ! आओ तुह्मारा मनोवाञ्छित कार्यसिद्ध हुआ इस तपसे निश्चय लोकपाल वनोगे। इतना कहकर पुत्रवालों में श्रेष्ट विश्रवाने पुत्रको अपने रम्य एवं मुनिजनों से परिपूर्ण नाना पुष्प वृक्षोंसे शोभित आश्रम में लाकर नित्यकर्म से निवृत्त होकर स्वस्थमनसे आदर पूर्वक

अनेन तपसा व्यक्तं लोकपालो भविष्यसि ।
इत्युक्त्वा स्वाश्रमं निन्ये पुत्रं पुत्रवतांवरः ३७
रम्यं मुनिजनाकीर्णं नानाकुसुमपादपम् ।
ततः स्वस्थमना भूत्वा निवृत्तात्मप्रयोजनः ३८
रामायणं भविष्यत्स श्रावयामास सादरात् ।
कालेन महता तेन तपसा समुपार्जिताम् ॥३९॥
प्रददावात्मपुत्राय गदां शरनिवारिणीम् ।
ततःपितुर्वाक्यविबुद्धमानसो
गदां गृहीत्वा शरवारणाह्वयाम् ।
मनोरमां काञ्चनहर्म्यमालिनीं
विवेश लङ्कानगरीं बिभीषणः ॥४०॥

इति श्री वाग्वतीप्रशंसायां त्रिभीषणास्त्रसिद्धिर्नाम द्वितीयोऽध्यायः ।

भविष्य रामायण सुनाया और लम्बे समय की तपस्यासे उपार्जित वाणोंका निवारण करने वाली गदा अपने पुत्रको दिया ॥ ३६ - ६७ - ३८ - ३९ ॥ तदनन्दर पिताके वाक्यसे प्रबुद्ध मनवाले लिभीषणने शरवारण नामकी गदाको लेकर अलौकिक शोभासे युक्त होकर सुवर्ण प्रकार वाली लङ्का नगरीमें प्रवेश किया ॥ ४० ॥

द्वितीय अध्याय समाप्त ।

भीष्म उवाच—

माहात्म्यं रुद्रधारायाः श्रुतं स्वर्गफलप्रदम् ।
अथान्यच्छ्रोतुमिच्छामि तीर्थं कामफलप्रदम् १

पुलस्त्य उवाच —

अत ऊर्ध्वं प्रवक्ष्यामि चैलगङ्गासमुद्भवम् ।
प्रकामफलदं पुण्यं तीर्थं पापप्रणाशनम् ॥ २ ॥
विष्णोर्भगवतो भीष्म धृतवाराहरूपिणः ।
चैलान्निपतितत्व त्तु चैलगङ्गेति विश्रुता ॥ ३ ॥
वाग्वत्याश्चैलगङ्गायाः सम्भेदे सत्त्वसङ्गमे ।
दशगङ्गाजलस्नानं पुण्यं स लभते नरः ॥४॥

भीष्म बोले— स्वर्गफल दाता रुद्रधारा तीर्थका माहात्म्य तो सुना अब इच्छानुकूल फलदाता अन्यतीर्थका माहात्म्य सुनना चाहता हुँ॥ १॥ पुलस्त्य बोले— अब यहाँसे उपर चैलगङ्गासमुद्भव तीर्थका वर्णन करेंगे जो अति पवित्र पापनाशक तथा प्रशस्त फलदायक है ॥ २॥ हे भीष्म! वराहरूपधारी भगवान् विष्णुके चैल (वस्त्र) से निकली है इस लिए चैलगङ्गाके नाम से प्रसिद्ध हुई ॥ ३ ॥ वाग्वती और चैलगङ्गा के सत्वसेवित सङ्गम पर स्नान करने वाला मनुष्य दश गङ्गा जलस्नानका

अत ऊर्ध्वं प्रवक्ष्यामि वाग्वतीभेदपर्वतम् ।
प्रकामफलदं पुण्यं गोकर्णेन कृताश्रमम् ॥ ५ ॥
अमोघे सलिलोद्भेदे वाग्वत्यां स्नायते तु यः ।
अमोघं व्रजते लोकं तीर्थसेवी नरोत्तमः ॥ ६ ॥
अमोघे वाग्वतीतीरे विधिना नियमेन च ।
तिथौ कृष्णचतुर्दश्यां वस्तव्यं तीर्थसेविना ॥७॥
एकरात्रोषितो भूत्वा तत्रैव नियमेन वै ।
अर्चयेच्छत्रजं लिङ्गं तीर्थसेवी प्रयत्नतः ॥ ८ ॥
पितॄन् सन्तर्पयेद्यस्तु तीर्थसेवी प्रयत्नतः ।
कुलं तारयते सर्वं दश पूर्वान् दशापरान् ॥९॥

फल प्राप्त करता है ॥ ४ ॥ यहाँसे उपर वाग्वती भेद पर्वत का माहात्म्य कहेंगे प्रशस्त फलदायक पुन्यतीर्थमें गोकर्णने आश्रम वनाया था ॥ ५ ॥ अमोध तीर्थ में वाग्वती में जो मनुष्य स्नान करता है वह तीर्थसेवी नरोत्तम अमोध लोकमें जाता है ॥ ६ ॥ वाग्वती के तीरवर्ती अमोध तीर्थमें विधिपूर्वक नियमसे कृष्ण चतुर्दशी तिथिमें तीर्थसेवीको वास करना चाहिए ॥ ७ ॥ वहींपर एकरात्रि उपवासकर नियमसे तीर्थसेवी प्रयत्न पूर्वक छत्रज लिङ्गका पूजा करे ॥ ८ ॥ जो तीर्थयात्री यहाँपर विधिसे पितरोंका तर्पण करता है वह दश पुस्ता

एकं यो भोजयेद् विप्रं सहस्रं भोजितं भवेत् ।
एकां यः कपिलां दद्याद् गोसहस्रप्रदो भवेत् १०
देहमुत्सृजते यस्तु कन्दरान्तर्नदीजले ।
अप्सरोभिः सह स्वच्छं स्वर्गलोकं स गच्छति ११
महाश्मजालाचितचारुकन्दरा-
न्नदीजलास्फालनशब्दनादितात् ।
विलोक्यमानादपि तीर्थसत्तमा-
द्विमुक्तपापो भवतीह तीर्थिकः ॥ १२ ॥

इति श्री वाग्वतीप्रशंसायां तीर्थवर्णनेऽमोघशैलादिवर्णनं नाम तृतीयोऽध्यायः ।

पूर्व दश पुस्ता परके तारकर समस्त कुलका कल्याण करता है ॥ ६ ॥ एक विप्रको भोजन करानेवाला सहस्त्रविप्र भोजनका फलप्राप्त करता है तथा एक कपिल गौदान करनेसे सहस्र गोदानका फल पाता है ॥ १० ॥ गिरिकन्दरा के अन्दर नदीजलमें जो देहत्याग करता है वह स्वेच्छासे अप्सराओके साथ स्वर्गलोक को जाता है ॥ ११ ॥ विशाल शिला जालसे खचित सुन्दर कन्दरा वाले नदीजलके आघातों के मधुर ध्वनिसे नादित इस उत्तर तीर्थके दर्शन मात्रसे तीर्थयात्री पापोंसे मुक्त होता है ॥ १२ ॥

तृतीय अध्याय समाप्त ।

पुलस्त्य उवाच—

अत ऊर्ध्वं प्रवक्ष्यामि वाग्वतीद्वारमुत्तमम् ।
महानागालयं रम्यं महाश्मशकलालयम् ॥ १ ॥
नानावृक्षलताकीर्णं नानापुष्पोपशोभितम् ।
नानाविहङ्गसङ्घुष्टं नानाषट्पदनादितम् ॥ २ ॥
सरित्सलिलझङ्कारशब्दसङ्घातभीषणम् ।
क्रीडास्थानं महागौर्या महातीर्थफलप्रदम् ॥ ३ ॥
नागाङ्गनाभिर्यक्षीभिरासुरीभिस्तथैव च ।
देव्याः प्रसादनार्थेन सेव्यते यत्र वाग्वती ॥४॥
मिश्रकेशी घृताची चालम्बुषा बुद्बुदा तथा ।

पुलस्त्य बोले—यहाँसे उपर उत्तम वाग्वतीद्वारका वर्नण करेंगे जो महानागोंका निवास स्थान है अतिमनोहर है विशाल शिलाखण्डो से चिनाहुवा है नाना प्रकार के वृक्षलताओंसे व्याप्त है नाना प्रकारके पुष्पोंसे शोभित है नाना प्रकारके पक्षिगणोंसे कूजित है नाना प्रकार के भ्रमरयूथोंसे निनादित है नदीके जलके झङ्कार शब्दोंके समूहसे भीषण है महागौरीका क्रीडा स्थान है, महातीर्थोंका फल देने वाला है। जहाँ पर गौरीदेवीको प्रसन्न करने के लिए नागाङ्गना यक्षकिन्नर गन्धर्वाङ्गना, असुराङ्गना आदि से वाग्वती सेवित है॥ १–२–३–४ ॥ जहाँ

क्रतुस्थला च रम्भा च मेनका पुञ्जिकस्थला ॥५॥
अन्याश्चाप्सरसः सर्वा देव्याराधनतत्पराः ।
सेवन्ते क्रीडनार्थेन वाग्वती यत्र निर्गताः ॥६॥
कुम्भयोनेरगस्त्यस्य तीर्थं तत्र प्रकामदम् ।
ह्रदोऽनन्तस्य नागस्य तत्र तीर्थं प्रकामदम् ॥७॥
तीर्थिकैरसकृच्जष्टं प्रकामफलदं शुभम् ।
उमातीर्थमितिख्यातं तीर्थं तत्रैव दृश्यते ॥ ८ ॥
अनन्त तीर्थमासाद्य स्नायते यस्तु मानवः ।
अनन्तभुवने रम्ये मोदते नागिनीगणैः ॥ ९ ॥
अगस्त्यतीर्थमासाद्य स्नायते यस्तु मानवः ।

पर वाग्वती प्रकट हुई है, वहाँ मित्रकेशी, घृताची, अलम्बुषा, बुद्बुदा, क्रतुस्थला, रम्भा, मेनका, पुञ्जिकस्थला, एवं अन्य सव अप्सरायें देवीकी आराधना में तत्पर होकर क्रीडा करती हैं ॥ ५–६ ॥ वहीं पर कलश से उत्पन्न हुए अगस्त्यका मनोवाञ्छित फलदायक तीर्थ है ॥७॥ वहीं पर प्रख्यात उमातीर्थ दिखाई देता है, प्रशस्त फलदायक जिस शुभ तीर्थ में तीर्थयात्री लोग वार वार जाते हैं ॥ ८ ॥ जो मनुष्य अनन्ततीर्थ में जाकर स्नान करता है वह नागिनी गणोंके साथ अनन्तलोक में जाकर आनन्द भोगता है ॥ ९ ॥ जो मनुष्य अगस्त्यतीर्थमें जाकर स्नान कर-

मोदते मुनिकन्याभि रगस्त्यभवने शुभे ॥१०॥
उमातीर्थं समासाद्य स्नायते यस्तु मानवः ।
स्त्रीषु सौभाग्यमाप्नोति स्त्री च पुंसि न संशयः ११
कृतोत्थानात्पवित्राङ्ग्या भूमिः साऽतिमनोरमा ।
सौन्दर्येणैव वाग्वत्याः सुन्दरीत्यभिधीयते १२
अत ऊर्ध्वं प्रवक्ष्यामि विमलाम्बुदचुम्बितम् ।
वाग्वतीप्रभवं पुण्यं सुरासुरनिषेवितम् ॥ १३ ॥
देवदानवगन्धर्वयक्षराक्षससाधुभिः ।
उपस्पृष्टजले पुण्ये रुद्रलोकफलार्थिभिः ॥ १४ ॥

ता है वह मुनिकन्याओं के साथ अगस्त्य के शुभ भवनमें सुख भोगता है ॥ १० ॥ जो मनुष्य उमातीर्थमें जाकर स्नान करताहै वह स्त्रियोंमें सौभाग्य प्राप्त करता है और स्त्री हो तो निस्संशय पुरुषोंमें सौभाग्य प्राप्त करती है ॥ ११ ॥ पवित्राङ्गी वाग्वतीके प्रस्दुभावसे वह भूमि अति मनोरमा है वाग्वतीके सौन्दर्य से ही सुन्दरी कहलाती है ॥ १२ ॥ यहाँसे उपर त्रिमल मेघोंसे चुम्बित पुण्यमय देवदानवोंसें सेवित वाग्वती प्रभव तीर्थ कहेंगे ॥ १३ ॥ जो मनुष्य रुद्रलोक फलाभिलाषी देव दानव गन्धर्व यक्ष राक्षस आदि साधुओंसे आचमन किया गयाहै जल जहाँका ऐसे पुण्य वाग्वती प्रभवतीर्थमें स्नानकरता है वह सुवर्ण के विमानसे रुद्रलोकको जाता है ॥ १४ ॥ महा-

वाग्वतीप्रभवे तीर्थे स्नायते यस्तु मानवः ।
काञ्चनेन विमानेन रुद्रलोकं स गच्छति ॥१५॥

महामृगाध्यासितशृङ्गशालिनः
प्ररुह्यमानादपि पर्वतोत्तमात् ।
विमुक्तपापो भवतेऽभिषेवकः
कृताभिषेकाः किमु वाग्वतीजलात् ॥१६॥

इति श्री वाग्वतीप्रभवतीर्थवर्णनं नाम चतुर्थोऽध्यायः ।

पुलस्त्य उवाच—

वर्णाधमेषु सर्वेषु सत्त्वेष्वश्राद्धिकेषु च ।
नाख्यातव्यमिदं पुण्यं पुराणं पापबुद्धिषु ॥ १ ॥

मृग (नरसिंह) से अध्यासित उत्तुङ्ग श्रृङ्गसे रमणीय उत्तर पर्वत (मृगेन्द्र शिखर) का आरोहण करनेसे भी तीर्थयात्री पापसे मुक्त हो जाता है, वाग्वती के जलसे अभिषेक (स्नान) करने पर तो कहना ही क्या है ? ॥१५–१६॥

चतुर्थ अध्याय समाप्त ।

पुलस्त्य बोले— समस्त अधम वर्णोंमें, अश्रद्धालु प्राणियोंमें, एवं पापबुद्धिवालोंमें इस पुण्य पुराण (पशुपतिपुराण) की कथा

ब्राह्मणेभ्यश्च वैश्येभ्यः क्षत्रियेभ्यस्तथैवच ।
वर्णोत्कर्षकशूद्रेभ्यस्तीर्थयात्रा प्रचक्ष्यते ॥ २ ॥
तस्मात्सत्कृत्य यत्नेन व्याख्यातव्यं शुभार्थिना ।
ब्राह्मणेषु विशेषेण पुराणं पुण्यवर्धनम् ॥ ३ ॥

इतितीर्थयात्राखण्डः समाप्तः

रम्ये गङ्गातटे पुण्ये भीष्मः शन्तनुनन्दनः ।
तीर्थयात्राप्रवक्तारं पुलस्त्यं मुनिमब्रवीत् ॥ १ ॥

भीष्म उवाच—

श्रुतः श्रुतफलोद्भूतस्तीर्थस्य गुणविस्तरः ।
पुनः कौतूहलं किञ्चिन्मम चेतसि वर्तते ॥ २ ॥

नहीं करनी चाहिए ॥ १ ॥ ब्राम्हण क्षत्रिय वैश्य तथा वर्णोत्कर्षक शूद्रोंमें तीर्थयात्राकी कथा करनी चाहिए ॥ २ ॥ इस लिए शुभार्थिको चाहिए कि विशेष कर ब्राम्हणोंमें सत्करापूर्वक यत्नसे पुण्यवर्धक पुराण की कथा करे ॥ ३ ॥

तीर्थयात्रा खण्ड समाप्त ।

रमणीय एवं पवित्र गंगातट पर राजा शन्तनु के आनन्ददायक सुपुत्र भीष्मने तीर्थयात्रा के वक्ता पुलस्त्य मुनि से कहा ॥ १ ॥ भीष्म बोले— शास्त्रोक्त फलदायक शास्त्रोंका सारभूत तीर्थोंका गुणविस्तार तो सुन लिया, पुनः मेरे चित्तमें कुछ कौतुक है ॥ २ ॥

वाग्वतीप्रभवस्थाने तीर्थानां प्रवरे शुभे ।
तस्मिन्नपि महाप्राज्ञ ! तपः केनकृतं पुरा ॥ ३ ॥
एवं पृष्टो महाप्राज्ञो गङ्गापुत्रेण धीमता ।
व्याजहार शुभं वाक्यं पुलस्त्यो मुनिसत्तमः ४
अस्मिंस्तीर्थे तपःकृत्वा राजपुत्री प्रभावती ।
उमाया वरदानेन प्रद्युम्नमलभत्पतिम् ॥ ५ ॥

भीष्म उवाच—

प्रभावतीति विख्याता कस्य राज्ञः कुलोद्भवा ।
कस्योपदेशाद्देवर्षे तपस्तस्मिंश्चचार ह ॥ ६ ॥

पुलस्त्य उवाच—

तीरमादाय गण्डक्या यावत्तद्वाग्वतीतटम् ।
पूर्वापरायतस्याद्रेरधस्ताच्चन्दनागिरिः ॥ ७ ॥

शुभ तीर्थोंमें श्रेष्ठ वाग्वतीप्रभव स्थान में हे महाप्राज्ञ ! प्राचीन काल में किसने तप किया ? ॥ ३ ॥ इस प्रकार बुद्धिमान् गंगापुत्र के प्रश्न करने पर महापण्डित मुनिश्रेष्ठ पुलस्त्य शुभ वाक्य बोले ॥ ४ ॥ इस तीर्थ में तपस्या करके राजपुत्री प्रभावतीने उमादेवी के वर दान से प्रद्युम्न पति प्राप्त किया ॥ ५ ॥ भीष्म बोले-हे देवर्षे ! प्रभावती नाम से विख्यात राजकुमारी किस राजा के कुल में उत्पन्न हुई है ? और किस के उपदेश से वाग्वतीप्रभव

सुप्रभा नाम विख्याता पुरी स्वर्गपुरोपमा ।
तस्यामधिपतिः श्रीमान् महेन्द्रदमनो नृपः ८
रूपलक्षणसम्पन्ना जीवादपि गरीयसी ।
देवी प्रभावती नाम भगिनी तस्य भूपतेः ९
सखीभिरसकृद्यत्नैर्वरार्थं प्रतिबोधिता ।
पतिं न कांक्षते सा हि दैत्यदानवयोः कुले १०
अनिच्छन्तीं समुत्पत्य भगिनीं दैत्यसत्तमः ।
न ददौ प्रार्थ्यमानोऽपि वरार्थं दैत्यदानवैः ११
उद्यानानि विचित्राणि चन्दनागिरिमूर्धनि ।

में तप किया ? ॥ ६ ॥ पुलस्त्य बोले— त्रिशूलगण्डकी के तीर से वाग्वती के तट पर्यन्त पूर्व पश्चिम विस्तृत चन्दनागिरि के नीचे सुप्रभा नाम की स्वर्ग की अमरावतीपुरी के तुल्य विख्यात पुरी थी, उस राजधानी में श्रीमान् राजा महेन्द्रदमन राज्य करता था ॥ ७-८ ॥ उस राजा महेन्द्रदमन की प्राणों से भी प्यारी बहिन रूप तथा लक्षणों से सम्पन्न प्रभावतीदेवी थी ॥ ९ ॥ वह प्रभावती सखियों के वारंवार प्रयत्न पूर्वक समझाने पर भी दैत्य और दानवों के कुलका पति नहीं चाहती थी ॥ १० ॥ इसलिए दैत्य दानवों के प्रार्थना करने पर भी दैत्य श्रेष्ठ महेन्द्रदमनने बहिन की इच्छा के बिना किसीको नहीं दिया ॥ ११ ॥ उस दैत्योत्तम महेन्द्रदमनने भगिनी (प्रभावती) की प्रीतिके लिए

प्रीत्यर्थं कारयामास भगिन्या दैत्यसत्तमः १२
वाग्वतीं च ह्रदीभूतां कमलोत्पलभूषिताम् ।
क्रीडार्थं निर्ममे देव्या भगिन्याःस महीपतिः १३
तस्य राज्ञः प्रतापेन रक्षिता वरसुन्दरी ।
न शक्यते वलान्नेतुं कैश्चिदप्यमरादिभिः १४
अतो निर्भयसंचारा राजपुत्री प्रभावती ।
तपोयोगरता नित्यं रूपातिशयशालिनी १५
नानारत्नालये रम्ये महेन्द्रदमनालये ।
क्रीडोद्यानेषु रम्येषु चित्रपुष्पाकुलेषु च ॥ १६ ॥

चन्दनागिरि (चन्द्रगिरि – चन्द्रागडी – चितलाङ्) के शिखर पर विचित्र उद्यान वनवाये ॥ १२ ॥ एवं प्रकार उस राजाने वाग्वतीको रोक कर सरोवर वनाया और उस में नाना प्रकार के कमल कुमुद लगाये सव प्रकार देवी वहिन के क्रीडाका साधन जुटाया ॥ १३ ॥ उस राजा के प्रताप से सुरक्षित उस अलौकिक सुन्दरी प्रभावतीको देव दैत्य दानव आदि कोई भी बलात्कार से ले नहीं सकते थे ॥ १४ ॥ अतएव निर्भय हो कर विहार करने वाली अत्यन्त सौन्दर्य शालिनी राजकुमारी प्रभावती नित्य तपस्या तथा योगका अभ्यास करती हुई नाना प्रकार के रत्नों से निर्मित तथा पूर्ण रमणीय अपने वडे भाई दैत्य राज महेन्द्रदमन के राज भवन में, रङ्गविरङ्ग के विविध पुष्पों से रमणीय क्रीडोद्यानों में

तोयावगाढे वाग्वत्याः कमलोत्पलभूषिते ।
सुरम्येषु नगाग्रेषु दरीषु कन्दरासु च ॥ १७ ॥
मोहयन्ती मनो यूनां रूपणाप्रतिमेन वै ।
सखीभिः सह सा देवी रराम रुचिरानना १८
नियमैरुपवासैश्च साभिषेकैश्च सन्ततम् ।
पूजाभिश्च विचित्राभिर्विधानैरपरैरपि ॥ १९ ॥
तपोयोगरता सा हि महर्षेर्वचनेन वै ।
उमामाराधयामास वाग्वतीप्रभवे गिरौ ॥ २० ॥
ततः कालेन दीर्घेण वरदानार्थमागताम् ।
योगीश्वरीमुमादेवीं ददर्श शिवसुन्दरीम् ॥ २१ ॥

कुमुद कमलों से भूषित वाग्वती के जल से पूर्ण सरोवर (नेपाल उपत्यका) में सुन्दर पर्वतशियरों में गुहा तथा कन्दराओं में अतुल रूपसे युवकोंके मनको मोहित करती हुई सुन्दरमुखी वह देवी प्रभावती सखियोंके साथ चिरकाल तक क्रीडा करती रही ॥ १५ १६ १७ १८ ॥ त्रिकाल स्नानोंसे नियमोंसे उपवासोंस विचित्र पूजाओंसे अन्य विधानोंसे निरन्तर तपस्या और योगमें तत्पर रहकर महर्षिके वचनसें प्रभावतीने वाग्वती-प्रभव पर्वत (शिवपुरी) पर उमाकी आराधना की ॥ १९ २० ॥ तत्पश्चात् दीर्घकालमें वरदानके लिए आई हुई योगीश्वरी शिव-

दृष्टमात्रेण सा देवीं प्रणम्य विनयेन वै ।
स्तुत्वा स्तुतिशतैः पुण्यैरिदं वचनमब्रवीत् २२
पुण्येन महता देवि ! दृष्टं त्वत्पादपङ्कजम् ।
तपः सुसिद्धिरभवन्निश्चितं ममकांक्षितम् ॥२३॥
तस्यास्तद्वचनं श्रुत्वा वरदा पर्वतात्मजा ।
अब्रवीदीदृशं वाक्यं प्रहर्षोत्फुल्ललोचना ॥२४॥
एवमेवेति सुश्रोणि ! निश्चितं मम दर्शनात् ।
सिद्धं ते कांक्षितं वस्तु पुण्यञ्चापि प्रवर्धते ॥२५॥
आगमिष्यति सोऽत्रैव प्रद्युम्नो रूपिणां वरः ।

सुन्दरी उमादेवीको प्रभावतीने देखा ॥ २१ ॥ दर्शन पाते ही प्रभावतीने विनय पूर्वक प्रणाम कर सैकडों पवित्र स्तुतियों से स्तुति करके प्रभावतीने यह वचन कहा ॥ २२ ॥ हे देवि ! महापुण्यसे तुह्मारे चरणकमल का दर्शन मिला तपस्याकी सिद्धि हुई और मेरा अभीष्ट भी निश्चितरूप से सिद्ध हुआ ॥ २३ ॥ उसका वह वचन सुन कर हर्षसे प्रफुल्लनेत्रा वरदात्री पर्वत राज— कन्या पार्वती इस प्रकार का वचन बोली ॥ २४ ॥ हे सुश्रोणि ! तथास्तु मेरे दर्शनसे निश्चय तुह्मारा मनोवाञ्छित वस्तु सिद्ध होगा एवं पुण्य भी वढेगा ॥ २५ ॥ हेवरानने ! वह सुन्दरो में श्रेष्ठ प्रधुम्न यहीं पर आवेगा और उसके साथ तुह्मारा

भविष्यति विवाहश्च सह तेन वरानने ॥२६॥
त्वं प्रवेक्ष्यसि हेभद्रे द्वारकाञ्च मनोरमाम् ।
इत्युक्त्वा हिमवत्कन्या तत्रैवान्तरधीयत २७
ततः प्रहृष्टा दितिजेद्रकन्यका,
तपःश्रमाक्लान्तविलोचनोत्पला ।
प्रभावती पङ्कजगर्भकोमला,
विनिर्ययौ स्वं भवनं मनोरमम् २८

इति श्री वाग्वतीप्रशंसायां प्रद्युम्नविजये गौरीवरप्रदानो नाम पञ्चमोऽध्यायः ।

पुलस्त्य उवाच—

ततो देव्याः प्रभावेण प्रद्युम्नो रुक्मिणीसुतः ।
प्रणम्य पितरं मूर्ध्ना चेदं वचनमब्रवीत् ॥ १ ॥

बिवाह होगा ॥ २६ । हे भद्रे ! तुम मनोहर द्वारका पुरी में प्रवेश करोगी । इतना कहकर हिमालयकी कन्या पार्वती वहीं पर अन्तर्धान होगई ॥ २७ ॥ उस के बाद तपस्याके परिश्रमसे कुह्मलाये हुए नेत्रकमलवाली कमलके गर्भके तुल्य कोमलाङ्गी दैत्यराजकन्या प्रभावती प्रसन्न होकर अपने मनोहर भवनको चली गई ॥ २८ ॥

पञ्चम अध्याय समाप्त ।

पुलस्त्य बोले— उसके अनन्तर देवीके प्रभावसे रुक्मिणीपुत्र प्रद्युम्न पिताको शिरसे प्रणाम कर यह वचन बोले ॥ १ ॥

प्रद्युम्न उवाच—

भगवन्नेतुमिच्छामि तीर्थयात्रां यदृच्छया ।
शम्बरस्य बधोद्भूतं पाप्मानं मोक्तुमर्हसि ॥२॥
इत्युक्तमात्रेण तदा प्रद्युम्नेन महात्मना ।
व्याजहार शुभं वाक्यं भगवान् रुक्मिणीपतिः ३

श्रीकृष्ण उवाच —

नेष्यामि पुत्र हेवीर तीर्थयात्रां यदृच्छया ।
यात्रोत्सवरतानां हि कालो रम्यः प्रवर्तते ॥४॥
पश्य पद्मोत्पलाकाशैः पूर्यते दीर्घिकाजलम् ।
प्रसन्नसलिला जाताः सर्वाश्चैव समुद्रगाः ॥ ५ ॥

प्रद्युम्न बोले— भगवन् ! स्वेच्छापूर्वक तीर्थयात्रा करना चाहता हूँ, शम्बरासुर के बधसे लगे हुए पापसे मुक्त कीजिये ॥ २ ॥ महात्मा प्रद्युम्नके इतना कहने पर उस समय भगवान् रुक्मिणीरमण शुभ वाक्य बोले ॥ ३ ॥ श्रीकृष्ण बोले— हे वीर पुत्र ! यथेच्छ तीर्थयात्रा में ले चलेंगे क्योंकि यात्रा उत्सव आदि में तत्पर लोगोंके लिए सुन्दर समय है ॥ ४ ॥ देखो, कमल कुमुद आदियोंसे वापियोंका जल पूर्ण है, निर्मल स्फटिकतुल्य जलमें चन्द्रतारा सहित आकाश प्रतिबिम्बित है, समस्त नद नदी खोला नाला स्वच्छ होगये हैं, हंसो की मालाका विमल धवल वस्त्र धारण कर धरणी रमणीय दिखाई देती है,

दृश्यते धरणी रम्या हंसमालाऽमलांशुका ।
नीलमेघविनिर्मुक्ता निर्मलाश्च दिशो दश ॥६॥

पुलस्त्य उवाच —

इत्युक्त्वा भगवान् विष्णुः शंखचक्रगदाधरः ।
आरुरोह गरुत्मन्तं प्रद्युम्नस्तु रथोत्तमम् ॥ ७ ॥
तत्क्षणादेव देवेशः सपुत्रो गरुडध्वजः ।
तीर्थयात्राटनार्थेन द्वारकामजहात् पुरीम् ॥ ८ ॥
देविकाप्रभवं चैव वितस्तिप्रभवं तथा ।
सिन्धोश्च प्रभवं चैव शतद्रुप्रभवं तथा ॥ ९ ॥
प्रभवं च सरस्वत्या यमुनाप्रभवं तथा ।
प्रभवं चैव गङ्गाया गोमतीप्रभवं तथा ॥ १० ॥

श्रावण के नीलवर्ण सजल जलधरोंसे मुक्त हो कर दशों दिशायें निर्मल हो चुकी हैं ॥ ५–६ ॥ पुलस्त्य बोले— इतना कह कर चारों भुजावों में शंख चक्र गदा पद्म ले कर भगवान् विष्णु गरुड पर आरूढ हुए, किन्तु प्रद्युम्न उत्तम रथ पर चढे ॥ ७ ॥ पुत्र सहित देवेश्वर गरुडध्वजने तीर्थाटन के निमित्त तत्काल द्वारकापुरीको त्याग दिया ॥ ८ ॥ क्रमशः) देविका नदीप्रभवतीर्थ, वितस्तिप्रभव, सिन्धुप्रभव, शतद्रुप्रभव, सरस्वतीप्रभव, यमुना प्रभव, गङ्गाप्रभव (गङ्गोत्तरी), गोमतीप्रभव, सरयूप्रभव,

सरयूप्रभवं चैव गण्डकीप्रभवं तथा ।
सप्तलीति ह्रदं चैव कौशिकीप्रभवं शुभम् ११
अनेकानि च तीर्थानि भ्रमन्नन्यानि चैव हि ।
वाग्वतीप्रभवं प्राप्तः सपुत्रो भगवान् हरिः १२
ततः सम्प्राप्तमात्रेण नारदो मुनिसत्तमः ।
स्तुत्वा स्तुतिसतैः पुण्यैरिदं वचनमब्रवीत् १३
भगवन् पुण्डरीकाक्ष सूर्यकेतुर्नराधिपः ।
चिरकालोषितस्तत्र श्वेतकापुरिकांक्षया ॥१४॥
सा राजदुहिता देवी प्रद्युम्नाय प्रकल्पिता ।
नाम्ना चन्द्रावती गीता चन्द्रबिम्बनिभानना १५
तां हर्तुमीहते देवीं महेंद्रदमनोऽसुरः ।

गण्डकीप्रभव, सप्तलीह्रद, कौशिकीप्रभव एवं अनेक अन्य तीर्थों में भ्रमण करते हुए पुत्र सहित भगवान हरि वाग्वतीप्रभव (शिवपुरी) तीर्थ में आये ॥ ९–१०--११--१२॥ तदनन्तर शतशः पवित्र स्तुति कर मुनि श्रेष्ठ नारद यह वचन वोले ॥ १३ ॥ भगवन् ! हे पुण्डरीकाक्ष ! राजा सूर्यकेतु श्वेतकापुरीकी इच्छासे वहां पर चिरकालसे निवास करता है ॥ १४ ॥ चन्द्रबिम्बतुल्य मुखवाली वह प्रसिद्ध राजकुमारी चन्द्रावती देवी प्रद्युम्नके लिए संकल्पित है ॥ १५ ॥ राजा के कन्यादान विना मोह से

सम्मोहादेव दुर्बुद्धिरप्रदानान्महीपतेः ॥ १६ ॥
अतः पूर्णेन्दुवदनां नीलोत्पलदलेक्षणाम् ।
रूपातिशायिनीं देवीं विवाहे गृह्यतां विभो १७
दीर्घकालनिरुद्धाङ्गी चन्दनागिरिमालया ।
वाग्वती च सरिच्छ्रेष्ठा गङ्गां द्रष्टुं समीहते १८
पुनः प्रभावती नाम राजपुत्री यसस्विनी ।
प्रद्युम्नं रूपिणां श्रेष्ठं कांक्षते तपसाऽसकृत् १६
अतोऽद्रिशिखरे रम्ये प्रद्युम्नेन महात्मना ।
अद्यैकां रजनीमत्र वस्तव्यं मम शासनात् २०
ततः श्रुत्वा मुनेर्वाक्यं भगवान् मधुसूदनः ।
अब्रवीदीदृशं वाक्यं विस्मयोत्फुल्ललोचनः २१

दुर्बुद्धि असुर महेन्द्रदमन उस देवी को हरना चाहता है ॥ १६ ॥ इसलिए पूर्णचन्द्रमुखी नीलकमलदलतुल्यलोचना अतिसुन्दरी देवीको विवाहकर ग्रहण की जिये ॥ १७ ॥ चन्दनागिरि (चितलाङ्) की माला से चिरकाल से निरुद्धजला नदीश्रेष्ठ वाग्वती गङ्गाका दर्शन करना चाहती है ॥ १८ ॥ फिर प्रभावती नामं की यशस्विनी राजपुत्री सुन्दरों में श्रेष्ठ प्रद्युम्नकी इच्छा से वारंवार तपस्याकर रही है ॥ १६ ॥ इस लिए सुन्दर शैलशिखर पर महात्मा प्रद्युम्न के साथ आज एक रात्रि मेरी

सम्बन्धित्वं नरपतेः सूर्यकेतोर्विशेषतः ।
कथं नेच्छामि देवर्षे अभिप्रेतं त्वया पुनः २२
अनिहत्य दुरात्मानं शक्रशत्रुं सुदुर्जयम् ।
चन्द्रावत्या विवाहस्तु सद्यः किन्तु न शोभते २३
हर्तुं चन्द्रवतीं मोहादीप्सतश्च दुरात्मनः ।
भविष्यति वधस्तस्य प्रद्युम्नेन महात्मना ॥२४॥
अहमप्यागमिष्यामि तस्मिन्नवसरे शुभे ।
तदा मोचयामि देवर्षे भित्वा शैलं सरिद्वराम् २५
तस्मिन्नवसरे पुण्ये देवकण्टकवर्जिते ।
चन्द्रावत्या विवाहश्च भविष्यति ममाज्ञया ॥२६॥

प्रार्थनासे निवास कीजिये ॥ २० ॥ उसके अन्तर मुनिका वाक्य सुनकर भगवान् मधुसूदन विस्मयसे नेत्रोंको प्रफुल्ल कर ऐसा वचन बोले ॥ २१ ॥ राजाका सम्बन्ध (समधी) विशेषकर सूर्यकेतुका कैसे न चाहें हे देवर्षे! पुनः आपका अभीष्ट तो अवश्य चाहते हैं ॥ २२ ॥ किन्तु दुरात्मा दुर्जय इन्द्रके शत्रुको नमारकर तत्काल चन्द्रावतीका विवाह शोभा नहीं देता ॥ २३ ॥ मोहसे चन्द्रावतीको हरनेकी इच्छा वाले उस दुरात्माका बध महात्मा प्रद्युम्नके द्वारा होगा ॥ २४ ॥ उस शुभ अवसर पर मैं भी आऊँगा, हे देवर्षे !! उसी समय पर्वतको फोड कर श्रेष्ठ

दृष्टमात्रे विवाहे च चन्द्रावत्यास्तदैव हि ।
राजर्षेः सूर्यकेतोस्तु गन्तव्यं श्वेतकापुरम् २७
अद्यैकां रजनीमत्र रम्येऽस्मिन् शैलमूर्धनि ।
प्रद्युम्नेन च वस्तव्यं महर्षे वचनात्तव ।। २८ ।।

इतीरयित्वा वचनं यथेप्सितं,
दिशं शरच्छुभ्रबलाहकाकुलाम् ।
सुवर्णशैलाग्रसमानरूपिणं,
खगेन्द्रमारुह्य विनिर्ययौ हरिः २८

इति श्री वाग्वतीप्रशंसायां महर्षिसंदर्शनं नाम षष्ठोऽध्यायः ।।

नदी वाग्वतीको भी मुक्त करूँगा ।। २५ ।। देवकण्टकरहित उस पुण्य समयमें मेरी आज्ञासे चन्द्रावतीका विवाह होगा ।। २६ ।। उसी समय चन्द्रावतीका विवाह देखते ही राजर्षि सूर्यकेतुका श्वेतकापुरी प्रस्थान होगा ।। २७ ।। आज एक रात्रि इस रमणीय पर्वत शिखर पर प्रद्युम्नको हे महर्षे! तुह्मारे वचनसे रहना चाहिए ।। २८ ।। इतना वचन बोलकर अपनी इच्छानुसार सुमेरुके शिखर तुल्य गरुड पर चढकर शरद ऋतुके शुभ्रमेघोंसे व्याप्त दिशाकी ओर हरि निकल गये ।।२९।।

षष्ठ अध्याय समाप्त

पुलस्त्य उवाच—

ततः प्रहृष्टहृदयो नारदो मुनिसत्तमः ।
प्रभावतीं पुरोधाय प्रद्युम्नमिदमब्रवीत् ॥ १ ॥

नारद उवाच—

मधुस्त्वं पूर्वदेहेन कामश्चैव त्वमेव हि ।
या माधवी मधोर्भार्या सैषा देवी प्रभावती ॥ २ ॥
अस्माद्विकल्पमुत्सृज्य प्रतिगृह्णीष्व मानद ।
मत्प्रदत्तां विशेषेण वाणराजसुतामिमाम् ॥ ३ ॥
त्वञ्च रूपवतां श्रेष्ठो रूपाढ्या च प्रभावती ।
ममाज्ञया विवाहश्च कर्तव्यः सद्य एव हि ॥ ४ ॥
इत्युक्त्वा कृतमङ्गल्यो हर्षोत्फुल्लविलोचनः ।
नारदो भगवान् वाक्यमब्रवीदीदृशं पुनः ॥ ५

पुलस्त्य बोले— उस के वाद प्रसन्न मन से मुनिश्रेष्ठ नारद प्रभावतीको आगेकर प्रद्युम्नसे यह वचन बोले ॥ १ ॥ नारद बोले— तुम पूर्व जन्मके मधु हो, और कामदेव भी तुही हो, मधुकी पत्नी माधवी थी वही यह देवी प्रभावती है ॥ २ ॥ इस कारणसे विकल्प त्याग कर हेमानद ! विशेषकर मेरी दी हुई इस बाणराजकन्याका परिग्रह करो ॥ ३ ॥ तुम रूपवालो में श्रेष्ठ हो और रूपवतियों में श्रेष्ठ देवी प्रभावती है, मेरी आज्ञासे

अद्यैकां रजनीमत्र कर्तव्या वसतिस्त्वया ।
गन्तव्यो रथमारुह्य श्वः प्रभाते स्वसालयः ॥६॥
पूर्णचन्द्रानना रम्या कुमुदामोदशालिनी ।
समागता निशा सेयं सुरतोत्सुककारिणी ॥७॥
न विद्यते भयं चात्र निश्चयान्मम तेजसा ।
इत्युक्त्वा नारदो धीमान् स्वेच्छया क्वापि निर्ययौ ८
ततोऽप्सरोभिरसकृत्सेविते क्रीडया शुभे ।
विचित्रतरुखण्डाढ्ये चित्रपुष्पलतागृहे ॥९॥
विलसत्कुसुमाकीर्णे निनदद्भ्रमराकुले ।
निघुष्टकिन्नरोद्गीते विलसन्मृगसेविते ॥१०॥

शीघ्रही विवाह करो ॥४॥ इतना कह कर मङ्गल कर हर्षसे प्रफुल्लनेत्रवाले भगवान् नारद पुनः इस प्रकारका वचन बोले ॥५॥ आज एक रात्रि तुमको यहीं वास करना चाहिए, कल प्रातः रथपर आरूढ होकर अपने घर जाना ॥६॥ मुकुदोंसे आमोदित पूर्णचन्द्रमुखी वही यह सुरतोत्सुकता करने वाली रमणीय रात्रि आरही है ॥७॥ मेरे तेजसे यहाँपर कोई भय भी नहीं है, इतना कहकर बुद्धिमान् नारद स्वेच्छासे कहीं निकल गये ॥८॥ तदनन्तर जहाँपर क्रीडार्थ वारंवार अप्सरायें आती-हैं ऐसे सुन्दर, विचित्र वृक्षोंके झुण्डोंसे शोभायमान, चित्र विचित्र पुष्पलताकुञ्जवाले, खिलते हुए कुसुमोंसे

अङ्के निधाय सुश्रोणीं लज्जमानां प्रभावतीम् ।
तत्र शैले सुखासीनः प्रद्युम्नो वाक्यमब्रवीत् ११
पश्य त्वद्वक्त्रपूर्णेन्दुकान्त्या विजितमम्भसि ।
सङ्कोचं याति कमलं भद्रे चन्द्रांशुशङ्कया ॥१२॥
वाग्वत्या विमले तोये विरुते जलपक्षिणाम् ।
पिशुनं क्रियते देवि तव नूपुरनिस्वने ॥ १३ ॥
ज्योत्स्नाभिर्विमलाभिर्गामभिषिञ्चन् महीधरम् ।
विभाति भगवांश्चन्द्रो यामिनीतिलकोपमः १४
किञ्जल्ककपिलाङ्गानां षट्पदानां वरानने ।
समुच्चरन्ति हुङ्कारा विबुद्धे कुमुदाकरे ॥ १५ ॥

व्याप्त, झंकार करते हुए भ्रमरोंसे भरे, किन्नरोंके मधुर गीतसे ध्वनित, निश्शङ्क मृगोंकी क्रीडा से मनोहर, उस पर्वत पर सुख पूर्वक बैठे प्रद्युम्नने लज्जालु सुन्दरकटी प्रभावतीको अङ्कमें रखकर यह वाक्य कहा ॥ ९-१०-११ ॥ हे भद्रे ! देखो, तुह्मारे मुखरूपी पूर्णचन्द्रकी कान्तिने पराजित होकर चन्द्रमा के किरणोंकी शङ्कासे कमल पानी में संकुचित है ॥ १२ ॥ हे देवि ! वाग्वतीके निर्मल जलमें विहार करते हुए जलपक्षियों- का कलरव तुह्मारे नूपुरों की ध्वनिकी शङ्का उत्पन्न करता है ॥ १३ ॥ यामिनी कामिनी के भालपटलके तिलक तुल्य भगवान् चन्द्रमा निर्मल चन्द्रिकाओंसे पृथ्वीका और पर्वतका अभि-

त्क्षिप्तपुष्परजोऽजस्रं वाग्वतीजललासकः ।
प्रवाति पवनो देवी मन्दमङ्गसुखप्रदः ॥ १६ ॥
मन्दालिकालयोपेतं मन्मनोमोहकारणम् ।
उद्गीतं किन्नराणाञ्च श्रूयते शुभगध्वनि ॥ १७ ॥
इत्युत्वा रूपिणां श्रेष्ठः प्रद्युम्नः प्रियया सह ।
स रेमे रजनीमेकां रम्येऽस्मिन् शैलमूर्धनि १८
ततः प्रभातसमये राजपुत्री प्रभावती ।
विनयेनाञ्जलिं कृत्वा प्रद्युम्नमिदमब्रवीत् ॥ १९ ॥
महेन्द्रदमनो नाम भ्राता मम दुरासदः ।
शम्बरस्य बधं श्रुत्वा सततं त्वयि कुप्यति २०

षेक करते हुए विराजमान हैं ॥ १४ ॥ हेवरानने! प्रफुल्ल कुसुमाकरों में कुसुमकेशरोंसे पीले अङ्गवाले भ्रमरोंके हुँकार हो रहे हैं ॥ १५ ॥ हे देवि! निरन्तर पुष्परजको उडाताहुआ, वाग्वती के जलको नचाता हुआ, अङ्गोंको सुख देने वाला पवन मन्द मन्द चल रहा है ॥ १६ ॥ मन्दालिकालय सहित सुन्दर ध्वनिवाला मेरे मनको मोहित करनेवाला किन्नरोंका उत्कृष्ठ गीत सुनाइ देता है ॥ १७ ॥ इतना कहकर सुन्दरों मे श्रेष्ठ प्रद्युम्नने प्रियाके साथ इस रम्य शैलशिखर पर एक रात्रि विहार किया ॥ १८ ॥ प्रभात समयमें राजपुत्री प्रभावतीने

प्रद्युम्न रूपिणां श्रेष्ठ महर्षेर्वचनात्तथा ।
तस्माद्रम्येऽपि शैलेऽस्मिन्न चिरं स्थातुमर्हसि २१
सखी चन्द्रावती चैव नित्यं तव हितैषिणी ।
विन्यासः स्थाप्यतां यस्माद्वाग्वतीसलिले शुभे २२
वचनान्ते ततो देव्याः प्रद्युम्नो रूपिनां वरः ।
संपूज्य वाग्वतीं यत्नैरिदं वचनमब्रवीत् ॥ २३ ॥
रुद्रवक्त्राद्विनिर्याते रुद्रलोकफलप्रदे ।
दैत्येन्द्रपुण्यकेतोस्तु पताकांशुकसन्निभे ॥२४॥
आसुरीभिश्च यक्षीभिरप्सरोभिस्तथैव च ।
उपस्पृष्टजले पुण्ये प्रकामफलदायिके ॥ २५ ॥

विनय पूर्वक हाथ जोडकर प्रद्युम्नसे यह कहा ॥१६॥ मेरा भाई दुर्जय महेन्द्रदमन शम्बरका बध सुनकर सदैव तुम पर क्रोध करता है ॥ २० ॥ रूपशालियोंमें श्रेष्ठ हे प्रद्युम्न! इस लिए एवं महर्षिके वचनसे रमणीय होने परभी चिरकाल इस पर्वतमें रहना ठीक नहीं है ॥ २१ ॥ और सखी चन्द्रावती भी नित्य तुम्हारा ही हित चाहती है, इस लिए यत्नसे वाग्वती के शुभ जलमें विन्यास (धरोहर) रखो ॥ २२ ॥ तदनन्तर देवी के वचनसे अतिसुन्दर प्रद्युम्नने यत्नसे पूजा कर वाग्वतीको यह कहा ॥ २३ ॥ हे रुद्रके मुखारविन्दसे प्रादुर्भूते!

मृगेन्द्रशिखरोत्सङ्गे पाविते च निजोदकैः ।
सुरोपनीतमन्दाररजोरञ्जितवारिणि ॥ २६ ॥
रक्ष तां निम्नगे गर्भे सूर्यकेतुसुतामिमाम् ।
यथा न नीयते तेन महेन्द्रदमनेन सा ॥ २७ ॥
इत्युक्त्वा वाग्वतीतोये विनिक्षिप्य च सुन्दरीम् ।
आरुरोह रथं चित्रं कामगं मकरध्वजः ॥ २८ ॥
स्वच्छस्फटिकसङ्काशसरिद्वारिविराजिताम् ।
प्रमत्तभ्रमरालीनविबुद्धकमलाननाम् ॥ २९ ॥
प्रफुल्लकुसुमाकीर्णपर्वतोद्यानकञ्चुकाम् ।
शरदिन्दुकरापाण्डुराजहंससितांशुकाम् ॥ ३० ॥

हे रुद्रलोकका फल देनेवालि ! दैत्येन्द्र प्रह्लादके पुण्यमय ध्वज की पताकास्वरूपे ! आसुरी यक्षिणी किन्नरी अप्सरा आदियोंसे तुह्मारे जलका आचमन किया है, हे पुण्यमयी ! हे कामनानुकूल-फलदात्री नदी ! देवताओं द्वारा दिये गये कल्पवृक्षके पुष्पोंके परागसे रञ्जित जलवाले मृगेन्द्र शिखरके गोदमें अपने गर्भमें इस सूर्यकेतुकी पुत्रीको रखो जिससे वह महेन्द्रदमन हरण न कर सके ॥ २४–२५–२६–२७ ॥ इतना कह कर वाग्वती के जल में उस सुन्दरी को निक्षेप (धरोहर नासो) रख कर मीनकेतु प्रद्युम्न इच्छानुसार चलने वाले विचित्र रथ पर

विलोक्य धरणीं देवीमुत्तमामिव कामिनीम् ।
प्रयातो रुक्मिणीसूनुरिदं वचनमब्रवीत् ॥३१॥
उन्नतं पश्य सुश्रोणि दानवानां पुरोत्तमम् ।
मया विनिहतो यत्र समरे कालशम्बरः ॥३२॥
रुद्रश्चिच्छेद यत्रैव ब्रह्मणः पञ्चमं शिरः ।
रुचिरं पश्य सुश्रोणि काश्मीरं कुङ्कुमाकरम् ३३
पश्य पङ्कजगर्भोरु विषयं सिन्धुसंज्ञकम् ।
पूर्णेन्दुवदने पश्य पाश्चाद्देशं पृथक् पृथक् ३४
शंखशुभ्रसमुद्रोर्मिमालावसनशालिनीम् ।

चढे ॥ २८ ॥ स्वच्छ स्फटिक मणिके तुल्य नदी जलसे विराजमान, उन्मत्त भ्रमरौंसे अध्यासित विकसित कमलरूपी मुखवाली, प्रफुल्ल पुष्पोंसे व्याप्त पर्वतों के उद्यानोंकी चोलीवाली, शरदऋतुके पूर्णचन्द्रके किरणोंके समान शुक्ल राजहंसोंके श्वेतशाटिकाञ्चलवाली, उत्तम कामिनीके समान रमणीय पृथ्वीदेवीको देखकर प्रस्थान करते हुए रुक्मिणीनन्दन प्रद्युम्न यह वच बोले ॥ २९–३०–३१ ॥ हे सुमध्ये! दानवोंकी उन्नत एवं उत्तम पुरीको देखो, जहाँपर हमने युद्धमें कालशम्बरको मारा था ॥ ३२ ॥ और जहाँपर रुद्रने ब्रह्माके अभिमानी पञ्चम शिरको काटा था, हेसुश्रोणि! कुंकुम केशरकी खानि मनोहर काश्मीरको देखो ॥ ३३ ॥ हेपङ्कजगर्भोरू! सिन्धुदेशको देखो, हेपूर्णचन्द्रमुखि! पश्चिमके

पश्य पीनोन्नतकुचे द्वारकां नगरीं मम ॥ ३५ ॥
ततो विवेशात्मपुरीं मनोरमां,
मनोरमामोहविधायिविग्रहः ।
पुराङ्गनालोचनलोलषट्पदै-
र्निपीतिवक्त्राम्बुरुहो जनार्दनिः ३६

इति श्री वाग्वतीप्रशंसायां प्रद्युम्नविजये प्रभावतीविवाहो नाम
सप्तमोऽध्यायः ॥

पुलस्त्य उवाच—

ततः प्रहृष्टहृदयः सुप्रभाभवनं शुभम् ।
प्रविवेशाऽसुरैः पूर्णं नारदो मुनिसत्तमः ॥ १ ॥

पृथक् पृथक् देशोंको देखो ॥ ३४ ॥ हेपीनोन्नतकुचे! शंखोंसे शुभ्र समुद्रके तरङ्गोंकी मालाके दुकूलसे शोभित मेरी नगरी द्वारकाको देखो ॥ ३५ ॥ (इतना कहकर) नगरकी नारियोंके नेत्र रूपी भ्रमरोंके द्वारा निपीत मुखकमलवाले मनोरमाओंको मोहित करनेवाले सुन्दर शरीरवाले जनार्दननन्दन प्रद्युम्नने अपनी मनोरमा पुरीमें प्रवेश किया ॥ ३६ ॥

सप्तम अध्याय समाप्त ।

पुलस्त्य बोले— उसके अनन्तर मुनिसत्तम नारदने प्रसन्न मनसे असुरगणोंसे पूर्ण सुन्दर सुप्रभाभवनमें प्रवेश किया ॥ १ ॥

प्रविश्याऽन्तस्तदा शीघ्रं ज्वलन्तमिव तेजसा ।
रत्नाभरणसम्भूतप्रभापल्लवितश्रियम् ॥ २ ॥
चक्रचामरशंखाब्जश्रीवत्सकृतलक्षणम् ।
अलङ्कृतकराग्रेण शोभितं शुभकारिणम् ॥ ३ ॥
रक्तपद्मदलाताम्रज्वलल्लोलविलोचनम् ।
आवासमिव दर्पाणां भिन्नवैडूर्यसप्रभम् ॥ ४ ॥
अनेकासुरसङ्कीर्णसभालङ्कारसन्निभम् ।
माणिक्यशकलाकीर्णहेमासनवरस्थितम् ॥ ५ ॥
राज्यलीलासुखाम्भोधिनिमग्नवरविग्रहम् ।
ददर्श नारदो धीमान् राजानं शक्रतापनम् ६

शीघ्र भीतर प्रवेशकर उस समय तेजसे मानों जाज्वल्यमान, रत्नोंके अलङ्कारोंसे उत्पन्न प्रभासे पल्लवित शोभावाले, चक्र चवंर शंख कमल श्रीवत्स आदियोंसे उपलक्षित, केयूर कङ्कण अंगुलीयक आदिसे भूषित कराग्रवाले, शोभायमान शुभकरी, रक्तकमलके तुल्य ताम्रवर्ण जाज्वमान लोचनवाले मानों मूर्तिमान् अभिमान हो, ऐसे फुटे हुए वैदूर्यमणिके समान वर्णवाले, अनेक असुरोंसे भरी हुई सभाके अलङ्कारके तुल्य, माणिक्य खण्डोंसे जटित उत्तम सुवर्णसिंसासन पर विराजमान, राज्यलीलाके सुखसागरमें निमग्न सुन्दर शरीरवाले, इन्द्रको भी सन्तप्त करनेवाले

ततो दत्तवराशीश्च पठद्वेदो महामुनिः ।
निषसादाऽऽसनवरे कल्पिते हेमनिर्मिते ॥ ७ ॥
कौतूहलपरो भूत्वा दृष्ट्वाऽऽयातं महामुनिम् ।
अब्रवीदीदृशं वाक्यं श्रीमानसुरसत्तमः ॥ ८ ॥
आयातं व्योममार्गेण मेरुशृङ्गाग्रसन्निभम् ।
तस्य मूर्ध्नि समाविष्टमिन्द्रनीलसमप्रभम् ॥ ९ ॥
तदग्रेण समायातं बालादित्यसमप्रभम् ।
चरद्भिरसुरैर्दृष्टं मम शासनवर्त्तिभिः ॥ १० ॥
अव्यक्तं नावगच्छामि किमिदं वै तपोनिधे ।
ज्ञाता त्वमसि कार्याणां सर्वेषां मुनिसत्तम ॥ ११ ॥

राजाको बुद्धिमान् नारदने देखा ॥ २-३-४-५-६ ॥ उसके अन्तर वर आशीर्वाद देकर वेदपाठ करते हुए महामुनि स्वर्ण निर्मित सज्जित आसन पर बैठे ॥ महामुनिको आया देखकर कौतुकसे असुर राजने इस प्रकारका वचन बोला ॥ आकाशमार्गसे आता हुआ सुमेरुके शिखरके अग्रभागके समान यह क्या हैं ? इसके कन्धोंमें बैठा हुआ इन्द्रनीलमणिके सदृश प्रभावाला यह क्या है ? तथा इसके आगे २ आता हुआ बालभास्करके तुल्य कान्तिवाला यह क्या है ? मेरी आज्ञासे भ्रमण करते हुए असुरोंके द्वारा देखा गया यह क्या है ? सारा अव्यक्त है, ठीक २

ततस्तस्य वचः श्रुत्वा दैत्येन्द्रस्य महात्मनः ।
व्याजहार शुभं वाक्यं नारदो मुनिपुङ्गवः ॥१२॥
यदि कौतूहलं राजन् विद्यते तव साम्प्रतम् ।
श्रावयिष्याम्यहं क्षिप्रं दृष्टं स्वेनैव चक्षुषा १३
आयातो व्योममार्गेण वाग्वतीप्रभवं गिरिम् ।
मेरुशृङ्गाग्रसङ्काशो गरुत्मानिति विश्रुतः ॥१४॥
तस्य मूर्ध्नि समाविष्ट इन्द्रनीलसमप्रभः ।
यदुवंशपतिः श्रीमान् विष्णुरित्यभिधीयते १५
तदग्रेण समायातो बालादित्यसमप्रभः ।
रुक्मिणीतनयो वीरः प्रद्युम्न इति कीर्त्यते ॥१६॥

नहीं जान सका हेमुनि! कहिए, सभी कार्योंके ज्ञाता आप मुनि श्रेष्ठ हैं ॥ ११ ॥ उसके पश्चात् उस महान् आत्मा दैत्यराजका वचन सुनकर मुनिपुङ्गव नारद शुभ वाक्य बोले ॥ १२ ॥ राजन्! यदि कौतुक है तो अब हम शीघ्र अपने ही आंखोंसे देखी हुई बातको सुनायेंगे ॥ १३ ॥ आकाशमार्गसे वाग्वतीप्रभवशैल (मृगेन्द्रशिखर = शिवपुरी) आनेवाला सुमेरुशिखर समान प्रसिद्ध गरुड है ॥ १४ ॥ उस गरुडके स्कन्धमें वैठेहुए इन्द्रनीलके सदृश कान्तिमान् श्रीमान (लक्ष्मीपति) यदुवंशपति विष्णु हैं ॥ १५ ॥ विष्णुके आगे २ आनेवाला बालभास्कर-

तीर्थयात्राप्रसङ्गेन प्रागतो रुक्मिणीसुतः ।
चकार हरणं देव्याः प्रभावत्या यदृच्छया १७
तस्य तद्वचनं श्रुत्वा महर्षेरमितौजसः ।
अब्रवीदीदृशं वाक्यं श्रीमानसुरसत्तमः ॥१८॥
मुनिना विदितः किन्तु प्रागतो विष्णुरित्ययम् ।
यदि जानाम्यहं व्यक्तं सपुत्रं न त्यजामि तम् १९
इत्युक्तवति दैत्येन्द्रे विहस्याऽसुरसत्तमम् ।
नारदो भगवान् वाक्यमब्रवीदीदृशं पुनः २०
नाधिक्षेपस्त्वया वाच्यो विष्णोरमिततेजसः ।
दंष्ट्रारत्नं महारत्नं विद्यते यस्य वेश्मनि ॥ २१ ॥

कान्तिवाला रुक्मिणीपुत्र वीर प्रद्युम्न है ॥ १६ ॥ तीर्थयात्राके प्रसङ्गसे आए हुए रुक्मिणीपुत्रने अपनी इच्छासे प्रभावती देवीको हरण किया ॥ १७ ॥ अमित तेजस्वी उन महर्षिके उस वचनको सुनकर श्रीमान् असुर श्रेष्ठ इस प्रकारका वचन बोला ॥ १८ ॥ किन्तु विष्णु आया करके मुनिने जाना, यदि मैं व्यक्तरूपसे जानता तो पुत्र सहित उसको कभी न छोडता ॥ १९ ॥ दैत्येन्द्रके इतना कहने पर भगवान् नारद हँसकर असुर श्रेष्ठसे पुनः इस प्रकारका वाक्य बोले ॥ २० ॥ अमिततेजवाले विष्णुको तुम आक्षेप मत लगावो, जिसके भवनमें महारत्न

पुरा महावराहस्य दंष्ट्रया निर्मितं सुरैः ।
कदाचित्तेन वै लब्धं रत्नं सूर्यसमप्रभम् ॥ २२ ॥
दिवा रक्षितमर्केण रजन्याममृतांशुना ।
दिवानिशञ्च यत्नेन यादवैः परिरक्षितम् ॥२३॥
नवोदितार्कबिम्बाभं नित्यमेव सुपूजितम् ।
रत्नमस्ति महाबाहो कामदं लोकदुर्लभम् ॥२४॥
प्रभावात्तस्य रत्नस्य द्विगुणीभूतविक्रमम् ।
विष्णुं जेतुं महाबाहो कस्य शक्तिः प्रवर्तते २५
हरणेन प्रभावत्याः शम्बरस्य वधेन च ।
यदि कोपोऽस्ति दैत्येन्द्र ह्रियतां रत्नमुत्तमम् २६

दंष्ट्रारत्न विद्यमान हैं ॥ २१ ॥ पहले वाराह कल्पमें देवताओंने महावराहके दाँतसे बनाये हुए इस सूर्यतुल्यकान्तिवाले रत्नको एक समय विष्णुने प्राप्त किया ॥ २२ ॥ उस दंष्ट्रारत्नकी रक्षा दिनमें सूर्य करता है, रातमें चन्द्रमा करता है और रात दिन यादवलोग यत्नसे करते हैं ॥ २३ ॥ हेमहाबाहो! नित्य जिसकी पूजा होती है, वह नवोदित सूर्यबिम्बके समान रत्न सम्पूर्ण कामनाओंको पूर्ण करनेवाला लोकमें दुर्लभ है ॥२४॥ उस रत्नके प्रभावसे द्विगुण विक्रमवाले उस विष्णुको हेविशालभुजावाले! जितनेकी किसकी शक्ति है ॥२५॥ हेदैत्येन्द्र! प्रभावतीके हरण

तवैकस्यागतं गम्यमगम्यमपरैर्नृपैः ।
रत्नस्याहरणादन्यत्किमस्ति पृथिवीपते ॥ २७ ॥
एवं सम्भाष्य दैत्येन्द्रं ज्वलत्कोपानलाकुलम् ।
निष्क्रम्य राजभवनान्निर्ययौ स महामुनिः॥२८॥
गतेऽथ नारदे राजा रत्नाहरणहेतुना ।
राहुमादिश्य चन्द्रस्य ग्रहणं स प्रतीक्षते ॥२९॥
एकदा तु दिने रम्ये दृष्ट्वा सङ्केतमात्मनः ।
ज्वलदाताम्रनयनो भ्रुकुटीकुटिलालिकः॥३०॥
सन्नद्धो बद्धकवचः खड्गपाणिर्धनुर्धरः ।
सिंहस्कन्धो महोरस्को बलशौर्यसमन्वितः ३१

से तथा शम्बरके बधसे यदि क्रोध है नो उस उत्तम रत्नका हरण करो ॥ २६ ॥ एकमात्र तुम इस कामको कर सकते हो, और राजा लोग नहीं कर सकते, हेपृथिवीपते ! रत्नकी प्राप्तिसे अन्य उत्तम काम क्या है? ॥२७॥ इस प्रकार भाषण कर दैत्यराजको कोपानलसे जाल्यमान वनाकर राजभवनसे निकलकर वह महामुनि निकल गये ॥ २० ॥ नारदफे निकल जाने पर रत्न हरण के हेतुसे वह राजा राहुको चन्द्रग्रहणकी आज्ञा देकर प्रतीक्षा करने लगा ॥ २९ ॥ एक दिन तो अच्छे मुहूर्त्तमें अपना संकेत यादकर तप्तताम्रलोचन वाला वक्र भृकुटिसे कुटिल मुख

वायुवेगं समास्थाय सोऽसुरः क्रोधमूर्च्छितः ।
जगाम द्वारकां रम्यां रत्नाहरणहेतुना ॥ ३२ ॥
त्वरेणाऽऽसाद्य तं देशं रत्नाहरणलालसः ।
हरणोपायमालोक्य तस्थावसुरसत्तमः ॥३३॥
ततो निद्रावशगते जने पुरनिवासिनि ।
प्रद्युम्ने विभवासक्ते प्रभावत्या सहैव तु ॥३४॥
मन्त्रजापपरोभूत्वा स्थिते च मधुसूदने ।
राहुणा शशिनि ग्रस्ते संसर्गाविमलत्विषि ३५
प्रद्युम्नरूपमास्थाय सत्वरोऽसुरसत्तमः ।
प्रविवेश महाबाहू रत्नागारं मनोरमम् ॥ ३६ ॥

वाला दैत्यराज सज्जित होकर कवच धारण कर हाथमें खड्ग एवं धनुष लेकर सिंहके समान कन्धोंवाला विशाल छाति वाला बल तथा शौर्यसे युक्त वह असुर क्रोधसे चूर होकर वायुवेगसे रत्न हरण करने के लिए रमणीय द्वारका को चल दिया ॥३०–३१–३२॥ तुरन्त उस द्वारकामें जाकर रत्नहरणकी इच्छावाला वह असुर श्रेष्ठ हरणका उपाय देखता हुआ वैठा ॥ ३३ ॥ उसके बाद पुरवासियोंके निद्रावश हो जाने पर, प्रभावतीके साथ प्रद्युम्नके वैभवासक्त हो जाने पर, कृष्णके मन्त्रजपमें तत्पर हो जाने पर राहुके द्वारा चन्द्रग्रहण हो जानेसे तमः संसर्गसे चन्द्रमाके मलिन

निवारितोऽपि यत्नेन सर्वैस्तद्रत्नपालकैः ।
त्वरया रत्नमादाय निर्ययौ स तदालयात् ॥३७॥
अथ हृष्टमना भूत्वा लब्धरत्नो महाजवः ।
क्रमेण हिमवत्कुक्षिं प्राप्तवानसुराधिपः ॥ ३८ ॥

ततो विनिक्षिप्य स कच्छपासुरे,
प्रकामदं रत्नमनल्पदीधिति ।
विवेश रम्यं भवनं महासुरो,
विचित्ररत्नाङ्कुररश्मिरञ्जितम् ३९

इति श्रीवाग्वतीप्रशंसायां प्रद्युम्नविजये रत्नापहारो नामाऽष्टमोऽध्यायः ॥

हो जाने पर महाबाहु, असुरश्रेष्ठ (महेन्द्रदमन) ने प्रद्युम्नका रूप धारण कर तुरन्त ही मनोरम रत्नागारमें प्रवेश किया ॥ ३४-३५-३६ ॥ समस्त रत्न रक्षकोंके यत्न पूर्वक रोकने पर भी तुरन्त रत्न लेकर वह उस रत्नकोषसे निकल गया ॥३७॥ अब रत्न प्राप्त कर प्रसन्न मनसे प्रचण्ड वेगसे क्रमशः वह असुरराज हिमालयकी कुक्षिमें पहुँचा ॥ ३८ ॥ यहाँ आकर उस महासुर महेन्द्रदमनने प्रशस्त कान्तिवाले समस्त मनोरथ साधक उस दंष्ट्ररत्नको कर्कोटक ह्रदवासी कच्छपासुरके पास निक्षेप (न्यास नासो धरोहर) रख कर विचित्र रत्नोंके अङ्करोंकी रश्मियोंसे रञ्जित रम्य भवनमें प्रवेश किया ॥ ३९ ॥ २६१ ॥

अष्टम अध्याय समाप्त ।

पुलस्त्य उवाच—

ततो मुमोच शशिनं स्वग्रस्तं सिंहिकात्मजः ।
जगाम रजनी चैव क्षयं चन्द्रांशुना सह ॥ १ ॥
निद्रासुखविनिर्मुक्ता बभूवुः पुरवासिनः ।
रराज भगवान् सूर्यः कमलोत्पलहासनः ॥ २ ॥
ततः प्रभातसमये भगवान् मधुसूदनः ।
दंष्ट्रारत्नस्य पूजार्थं प्रविवेश तदालयम् ॥ ३ ॥
प्रवेशाऽनन्तरं शीघ्रं विनिष्क्रम्य तदालयम् ।
पप्रच्छ स महाबाहुस्तत्रस्थान् रत्नपालकान् ४

श्रीकृष्ण उवाच—

भोरत्नपालका यूयं क्व गतं रत्नमुत्तमम् ।
वाक्यं भगवतः श्रुत्वा प्रणम्याऽञ्जलिकारिणः ५

पुलस्त्य बोले— उसके पश्चात् सिंहिकाके पुत्र राहुने अपने ग्रास किये हुए चन्द्रमाको मुक्त किया और चन्द्रकिरणों के साथ ही रात्रि भी बीत गई ॥ १ ॥ पुरवासी लोग निद्रासे जागे, कमलोंको हँसानेवाले सूर्य भगवान् उदित हुए ॥ २ ॥ उसके अन्तर प्रभातकालमें भगवान् मधुसूदनने दंष्ट्रारत्नकी पूजा करने को उस भवनमें प्रवेश किया ॥ ३ ॥ प्रवेशके अनन्तर ही शीघ्र उस मन्दिरसे निकल कर महाबाहु कृष्ण ने वहाँ विद्यमान रत्नरक्षकों

ईदृशं वचनं प्राहुस्तत्रस्था रत्नपालकाः ।
एकेनाऽऽगत्य शर्वर्यां प्रगाढायां चतुर्भुज ॥ ६ ॥
प्रविष्टं तव पुत्रेण प्रद्युम्नेन तदालये ।
एवमुक्तवतां तेषां श्रुत्वा वाक्यमसंशयम् ॥ ७ ॥
प्रद्युम्नं त्वरयाऽऽहूय पप्रच्छ भगवान् हरिः ।
हृतं तद्रत्नकं पुत्र त्वयाऽऽज्ञा मम नास्ति हि ८
रात्रौ विशेषतोऽस्माकं प्रयच्छस्व तु तत् पुनः ।
न मया विधृतं तात रत्नजातं कदापि च ॥ ९ ॥

को पूछा ॥ ४ ॥ श्रीकृष्ण बोले— क्या तुम लोग रत्नपाल हो ? कहाँ गया उत्तम रत्न ? इस प्रकार भगवान का वाक्य सुनकर प्रणाम कर अञ्जलि बाँध कर वहाँ स्थित रत्नपालक इस प्रकारका वचन बोले— हे चतुर्भुज ! गाढअन्धकारमय रात्री में तुह्मारे पुत्र प्रद्युम्नने अकेलेने आकर इस रत्नकोशमें प्रवेश किया था, इस प्रकार उनके निःसंशय वाक्य सुन कर तुरन्त ही प्रद्युम्नको बुला कर भगवान् हरिने पूछा — हे पुत्र ! वह रत्न तुमने चोरा है ? हमारी आज्ञा तो नहीं है ॥ ५-६-७-८ ॥ विशेषतः रात को हमारी यहाँ आनेकी आज्ञा नहीं है, रत्न लौटा दो । इस पर प्रद्युम्नने कहा — पिताजी ! मैने कदापि रत्न नही लिया मैं आपके आगे यह सत्य कहता हूँ । इस प्रकार यत्नसे पूछे जाने पर पुत्रके वचन सुनकर मुहूर्त पर्यन्त ध्यान लगाकर भग-

सत्यमेतन्मया व्यक्तं भवदग्रे निगद्यते ।
पुत्रस्य वचनं श्रुत्वा पृच्छ्यमानस्य यत्नतः १०
मुहूर्तं ध्यानमास्थाय भगवानिदमब्रवीत् ।
जानामि वीर हेपुत्र दुष्टं रत्नापहारिणम् ॥११॥
रूपं तव समास्थाय हृतं देवेन्द्रशत्रुणा ।
हत्वा दैत्यं दुरात्मानं दंष्ट्रारत्नापहारिणम् ॥१२॥
पूरणीयस्त्वया पुत्र देवेन्द्रस्य मनोरथः ।
गन्तव्यमस्माद् हेपुत्र जयार्थेनाऽऽत्मनस्त्वया १३
वधूं प्रभावतीञ्चैव नेष्यसि प्रियकांक्षिणीम् ।
अहमप्यागमिष्यामि सन्द्रष्टुं निधनं रिपोः १४
गङ्गादर्शनकांक्षिण्या वाग्वत्याश्च प्रमोक्षणात् ।

वान् यह कहने लगे — हे वीर पुत्र ! रत्नहरण करने वाले दुष्टको जानता हूँ ॥ ९-१०-११ ॥ तुह्मारा रूप धरकर इन्द्रशत्रु ने रत्न हरण किया है । दंष्ट्रारत्नहारक दुष्ट दैत्यको मारकर हे पुत्र ! तुमको देवेन्द्रका मनोरथ पूर्ण करना होगा । हे पुत्र ! इससे तुमको अपने विजयके लिए जाना चाहिए ॥ १२-१३ ॥ वधू प्रभावतीको भी लेजावो, यह तुह्मारी भलाई चाहती है । शत्रुका नाश देखनेके लिए मैं भी आऊँगा ॥ १४ ॥ गङ्गाका दर्शन करनेकी इच्छावाली वाग्वतीकी बन्धन मुक्तिसे इन्द्र तुह्मारी

तत्रैव हि जयो नित्यं देवराजावधार्यते ॥१५॥
पूजार्थं त्रिदशैः सार्धं स च व्यक्तं समेष्यति ।
इत्युक्त्वा भगवान्विष्णुर्देवकार्यहिते रतः १६
विस्मयोत्फुल्लनयनं पार्श्वस्थं मुनिमब्रवीत् १७

श्रीकृष्ण उवाच

सर्वं मद्वचनं ब्रूहि सहस्राक्षं महामुने ।
दैत्येन्द्रनिधनं द्रष्टुमायातव्यमिति स्वयम् ॥१८॥
तस्य वाक्यावसाने तु पितुर्मकरकेतनः ।
प्रणम्य शिरसा पादावारुरोह रथोत्तमम् ॥१९॥
ततो रथवरारूढः खड्गवाणधनुर्धरः ।
पठद्भिर्द्विजैः शीघ्रं जयाशीर्भिः प्रपूजितः २०

विजय चाहता है ॥ १५ ॥ समस्त देवताओंको साथ लेकर वह अवश्य पूजाके लिए आवेगा । इतना कहकर देवकार्य तत्पर विष्णु ने विस्मयसे प्रफुल्ल नेत्रवाले पार्श्ववर्ती मुनिको कहा ॥ १६–१७ ॥ श्रीकृष्ण बोले— हे महामुने ! मेरा यह सब समाचार इन्द्रसे जाकर कहो, दैत्येन्द्रवध देखने के लिए स्वयं आना चाहिए इत्यादि ॥ १८ ॥ पिता के वाक्यके अन्तमें मीनकेतु कामदेव (प्रद्युम्न) चरणोंमें शिरसे प्रणाम कर उत्तम रथ पर आरूढ हुए ॥ १९ ॥ उसके पश्चात् शीघ्र ही उत्तम रथमें बैठकर,

प्रयातो रथवर्येण कामगेन यदृच्छया ।
प्रहृष्टः पीवरोरस्कः प्रियालिङ्गनलालितः ॥२१॥
विलोक्य धरणीं रम्यां सरिच्छतविभूषिताम् ।
प्रद्युम्नो रूपिणां श्रेष्ठ इदंवचनमब्रवीत् ॥ २२ ॥
वितस्ता देविका सिन्धुः शतद्रुः सरिदुत्तमा ।
एताः पश्य तु सुश्रोणि पृथिव्या हारसन्निभाः २३
कुरुक्षेत्रस्य मध्येन गच्छन्ती पश्चिमोदधिम् ।
एषा सरस्वती रम्या पुण्यतीर्थशतानुगा २४
एषा विलोक्यतां देवि पावनी पृथिवीतले ।
ग्रथितोत्पलमालेव भ्राजन्ती यमुना नदी २५

हाथमें खड्ग बाण धनुष धारण कर, वेद पाठ करते हुए द्विजों के जयकार आशीर्वाद आदियोंसे पूजित होकर, रथी की इच्छानुकूल चलनेवाले उत्कृष्ट रथसे प्रस्थान करते हुए प्रसन्न हृदय विशाल छातीवाले प्रियालिङ्गनसे लालित रूपधारियोंमें श्रेष्ठ प्रद्युम्न सैकडों नदियोंके हारोंसे अलङ्कृत रमणीय धरणी का अवलोकन कर यह वचन बोले ॥ २०–२१–२२ ॥ हेसुश्रोणि ! देखो, ये पृथ्वीके हारोंके सदृश वितस्ता (विपाशा व्यासा) देविका (रानी) सिन्धु शतद्रु (शतरुद्रा शतलज) आदि उत्तम नदियां हैं ॥ २३ ॥ कुरुक्षेत्रके मध्यसे होकर पश्चिम समुद्रको जाती हुई सैकडों पुण्यमय तीर्थोंवाली यह रम्य सरस्वती है ॥

सोममण्डलसम्भूता निर्मलांशुकसन्निभा ।
एषा सन्दृश्यते भद्रे गङ्गा त्रैलोक्यपावनी ॥२६॥
उपस्पृष्टजला पुण्या नैमिषारण्यवासिभिः ।
रम्या दृषद्वती चापि गोमती चापि दृश्यते २७
एषा सन्दृश्यते देवि सरयू लोकपावनी ।
यामाश्रित्य दिवं यातो रामो दशरथात्मजः २८
गौरीगण्डस्थलोद्भूता कालाभ्रस्य रसोपमा ।
एषा विभाति सुश्रोणि गण्डकी सरिदुत्तमा २९
शैलमालानिरुद्धाङ्गी ह्रदीभूता मनोरमा ।
एषा सन्दृश्यते देवि वाग्वती लोकपावनी ३०

---

२४ ॥ हे देवि ! पृथ्वीतलमें गुँथी हुई नीलकमलोंकी मालाके तुल्य शोभावाली इस पवित्र यमुना नदीको देखो ॥ २५ ॥ हे भद्रे ! चन्द्रमण्डलसे प्रादुर्भूत निर्मल दुकूलके तुल्य धवल त्रैलोक्यपावनी यह भागीरथी गङ्गा दिखाई देती है ॥ २६ ॥ नैमिषारण्य निवासियोंसे आचमन किये गये जलवाली पवित्र एवं रमणीय दृषद्वती तथा गोमती दिखाई देती है ॥ २७ ॥ हे देवि ! वह लोकपावनी सरयू दिखाई देती है, जिसका आश्रय लेकर महाराजा दशरथके राजकुमार रामभद्र स्वर्ग पधारे ॥ २८ ॥ हे सुश्रोणि ! गौरीके गण्डस्थलसे उद्भूत काले अञ्जनके रस तुल्य

भवत्या ऽध्यासितः पूर्वं गौर्याराधनहेतुना ।
प्रणम्यतां त्वया भद्रे मृगेन्द्रशिखरो गिरिः ३१
इत्युक्त्वा रथमुत्सृज्य प्रद्युम्नो रूपिणां वरः ।
प्रविवेश सरः पुण्यं वाग्वतीजलपूरितम् ॥३२॥
ततः सरस्युन्मदहंससारसे,
विहृत्य कामः कुसुमौघशोभिते ।
गिरौ मनोज्ञे निषसाद केशविः
प्रभावतीविभ्रमवीक्षिताननः ३३

इति श्रीवाग्वतीप्रशंसायांप्रद्युम्नविजये उद्योगवर्णनो नाम नवमोऽध्यायः॥

यह नदियों में उत्तम गण्डकी शोभमान है ॥२६॥ यह शैलमालासे रुक कर मनोहर सरोवर बनी हुई लोकपावनी वाग्वती दिखाई देती है ॥३०॥ हेभद्रे! गौरीकी आराधनाके हेतुसे तुमने पहले जहाँ पर निवास किया था, उस मृगेन्द्रशिखर पर्वत को प्रणाम करो ॥३१॥ इतना कह कर रथ से उतर कर रूपशालियों में श्रेष्ठ प्रद्युम्न ने वाग्वती के जल से पूर्ण पवित्र सरोबर में प्रवेश किया ॥३२॥ तदनन्तर नानाप्रकारके कमल कुमुद कुसुमों से शोभित, उन्मत्त कलहंस सारस आदि जलचर पक्षियों से कल्लोलित, वाग्वती सरोवर (नागह्रद नेपाल) में विहार कर प्रभावती के द्वारा विलास विभ्रम से देखे गये मुखवाले केशवपुत्र कामदेव (प्रद्युम्न) मनोज्ञ पर्वत (मृगेन्द्रशिखर) पर बैठे ॥३२॥ नवम अध्याय समाप्त ।

पुलस्त्य उवाच—

अथ पङ्कजकिञ्जल्ककपिलीकृतविग्रहम् ।
शरदातपसंपर्कजातश्रमविवर्जितम् ॥ १ ॥
गिरेर्मनोरमे मूर्ध्नि निषण्णं मकरध्वजम् ।
सा विग्रहवती भूत्वा वाग्मती वाक्यमब्रवीत् २
ज्ञात्वा चन्द्रावतीं देवीं मद्धस्ते प्रतिपादिताम् ।
क्रुध्यते शक्रदमनो ज्वलत्कोपानलाकुलः ॥३॥
अतस्तस्य भयत्रस्तः सूर्यकेतुर्नराधिपः ।
मन्त्रजापेन घोरेण ध्यायते हि जयं तव ॥ ४ ॥
युद्धेऽपमातितस्तेन दैत्येन्द्रेण दुरात्मना ।
तवैव हि जयं निन्यं ध्यायते त्रिदशाधिपः ॥५॥

पुलस्त्य बोले— इसके अनन्तर कमलों के केशर से कपिलवर्ण शरीरवाले शरद ऋतु के आतप के संपर्क से उत्पन्न परिश्रम से रहित, पर्वत के मनोहर शिखर पर बैठे प्रद्युम्न से त्रह शरीरधारिणी हो कर वाग्वती बोली ॥ १-२ ॥ चन्द्रावती देवी को मेरे हाथ में सौंपी दुई जान कर जाज्वल्यमान क्रोध की अग्नि से आकुल व्याकुल हुआ महेन्द्रदमन मुझ पर रिस करता है ॥ ३ ॥ इसलिए इसके भय से त्रस्त होकर राजा सूर्यकेतु अघोर मन्त्र का जप करता हुआ तुह्मारा जय मनाता है ॥ ४ ॥ दुरात्मा उस

दीर्घकालं निरुद्धाङ्ग्या विरोधाङ्गरुजार्तया ।
मयाऽपि सततं बीर ध्यायते विजयस्तव ॥६॥
भगिन्या हरणे नूनमागतं परिशङ्कितम् ।
शरचापौ समुद्यम्य चन्द्रकेतुः प्रतीक्षते ॥७॥
तस्यास्तद्वचनं श्रुत्वा वाग्वत्या बलिनां वरः ।
प्रद्युम्नो रुक्मिणीसूनुरिदं वचनमब्रवीत् ॥ ८ ॥
दंष्ट्रारत्नापहरणं यः करोति सुदुष्करम् ।
हरणे चन्द्रवत्याश्च येन बुद्धिर्निदेशिता ॥ ९ ॥
भविष्यति बधस्तस्य निश्चयान्मम बाहुना ।
तथापि द्रष्टुमिच्छामि रिपो रूपं दुरात्मनः १०

दैत्य से युद्ध नें अपमानित होकर इन्द्र भी नित्य तुह्मारा ही जय चाहता है ॥५॥ दीर्घ काल से निरुद्ध अङ्गवाली तथा विराध राक्षस के अङ्ग के मथन से पीडिम मैं भी हे बीर ! सदा तुह्मारा ही जय मनाती हूँ ॥ ६ ॥ बहिन के हरणार्थ आए हुए महेन्द्रदमन से शङ्कित होकर राजा चन्द्रकेतु धनुर्बाण धारण कर प्रतीक्षा कर रहा है ॥ ७॥ उस वाग्वती के उस वचन सुन कर बलियों में श्रेष्ठ रुक्मिणी पुत्र प्रद्युम्न यह वचन बोले ॥ ८॥ जो दुष्कर दंष्ट्रारत्न का अपहरण करता है, एवं जिस ने चन्द्रावती के हरण में भी ध्यान दिया है; उसका बध निश्चय मेरे बाहु से होगा ।

तस्य तद्वचनं श्रुत्वा प्रमोदोद्धतमानसा ।
सा विग्रहवती देवी वाग्वती वाक्यमब्रवीत् ११
इहैष्यति महाबाहो निश्चयं शक्रतापनः ।
द्रष्टुं चन्द्रावतीं मोहात्कृतकौतूहलाकुलः ॥१२॥
ततस्तस्मिन् क्षणे पुण्ये विरहातुरमानसः ।
निर्ययौ स्वबिलाद्रम्यान्महेन्द्रदमनो नृपः ॥१३॥
दैत्येन्द्रमागतं दृष्ट्वा विरहातुरमानसम् ।
कृत्वा चन्द्रावतीरूपं तस्थौ मकरकेतनः ॥१४॥
ततः प्रभावती देवी समुत्थाय ससम्भ्रमा ।
विनयेनाऽञ्जलिं कृत्वा दैत्यन्द्रमिदमब्रवीत् १५

तथापि एक वार उस दुरात्मा शत्रु का रूप देखना चाहता हूँ ॥ ९-१० ॥ प्रद्युम्न के उस वचन को सुन कर आनन्द से प्रफुल्लचित्तवाली शरीरधारिणी देवी वाग्वती वह वाक्य बोली ॥११॥ हे महाबाहो! मोह से उत्पन्न कौतुक से व्याकुल महेन्द्रदमन चन्द्रावती को देखने के लिए अवश्य यहीं आवेगा ॥ १२ ॥ इसके पश्चात् पुण्य समय में विरह से आतुरचित्तवाला महेन्द्रदमन अपने रमणीय विल से निकला ॥ १३ ॥ विरह से आतुरचित्तवाले दैत्यन्द्र को आया हुआ देख कर मकरकेतु प्रद्युम्न चन्द्रावती का रूप धारण कर बैठे रहे ॥ १४ ॥ उसके आते ही प्रभा-

सखी चन्द्रावती देवी त्वद्गुणौघ-विमोहिता ।
प्रमाणं कुरुते नाथ लज्जया व्यथितेन्द्रिया १६
ततो भ्रूचापनिर्मुक्तैरपाङ्गेषुभिरुच्चकैः ।
विभेद हृदयं तस्य प्रद्युम्नः कामरूपधृक् ॥१७॥
दृष्ट्वा चन्द्रावतीं देवीं सानुरागानुवर्त्तिनीम् ।
प्रफुल्लनयनां राजा चेदृशं वाक्यमब्रवीत् ॥१८॥
पतिं मां प्राप्य सुश्रोणि त्रैलोक्याधिपतिं प्रभुम् ।
भोक्ष्यसे विपुलान् भोगांस्त्वं हि मर्त्येषु दुर्लभान् १६
एह्येह्युत्पलपत्राक्षि क्रीडार्थं बहुभिर्गुणैः ।

वती देवी सहसा उठकर वियपूर्वक अञ्जलि बाँध कर दैत्यन्द्र से यह कहने लगी ॥ १५ ॥ हेनाथ ! सखी चन्द्रावती देवी तुह्मारे गुणों के तरङ्गों से माहित होकर लज्जा से व्यथित इन्द्रियवाली तुमको प्रणाम करती है ॥ १६ ॥ इतना कहते ही कामरूपी प्रद्युम्न ने भृकुटी रूपी धनुष से मुक्त अपाङ्गरूपी बाणों से उसके हृदयका भेदन कर डाला ॥ १७ ॥ प्रफुल्ल नेत्रवाली चन्द्रावती देवी को अनुराग से अनुवर्तिनी देख कर राजा इस प्रकार के वचन बोला ॥ १७ ॥ हेसुश्रोणि ! त्रैलोक्य को अधिपति समर्थ मुझको पति प्राप्त कर तुम मर्त्यलोकों में दुर्लभ अनेक भोगोंको भोगोगी ॥ १६ ॥ हेकमलदलविशाललोचने ! बहुत से गुणों से सुप्रभाभवन स्वर्गसमान अतिरम्य है क्रीडार्थ

सुप्रभाभवनं रम्यं गन्तव्यं स्वर्गसन्निभम् ॥२०॥
मम कान्ताशतं श्रुत्वा भीतामाभूर्वराङ्गने ।
त्वां विमुच्य न चाऽन्यासां मुखं पश्यामि सुन्दरि २१
इत्युक्तवति दैत्येन्द्रे कन्यारूपी स केशविः ।
अब्रवीदीदृशं वाक्यं सान्तर्हासः स्मिताननः २२
त्वद्वाक्यमीदृशं पुण्यं यदि सत्यं नराधिप ।
कथं नेच्छामि पत्नीत्वं राजभोगंच शाश्वतम् २३
वर्तते हृदयं नूनं सततं त्वयि भूपते ।
तथापि नैतुमिच्छामि बलाद्बलवतां वर ॥२४॥
विधिनेह समागत्य ममाऽर्थेन समादरात् ।

आवो चलो ॥ २० ॥ हेवराङ्गने! मेरी सौ स्त्रियों को सुन कर भयभीत मत होना, तुम को छोड कर हेसुन्दरी ! औरों का मुख तक नहीं देखूंगा ॥ २१ ॥ दैत्यन्द्र के इतना कहने पर कन्यारूपी प्रद्युम्न मन २ में हँसते हुए प्रसन्न मुख से इस प्रकार का वाक्य बोले ॥ २२ ॥ हेराजन्! तुह्मारा यह पुण्यमय वचन यदि सत्य है तो तुह्मारा पत्नीत्व एवं शाश्वत राजभोगों को क्यों न चाहूँगी ? ॥ २२ ॥ हेभूपते ! हृदय तो सदा तुम में अवश्य है, तथापि हेबलियों में उत्तम ! बलात्कार से तो जानेकी इच्छा नहीं है ॥ २४ ॥ हेमहाबाहो ! मेरे लिए आदर एवं विधिपूर्वक यहाँ

प्रार्थनीयो महाबाहो पिता मे तपसां निधिः २५
तस्यास्तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः ।
मनोमोहपरो राजा भगिनीमिदमब्रवीत् ॥२६॥
यथा नाऽन्यत्र हृदयं चन्द्रावत्याः प्रजायते ।
तथा विधीयतां पुत्रि निशामेकां प्रयत्नतः २७
श्वः समागत्य विधिना सम्प्रार्थ्य पितरं स्वयम् ।
वरयिष्यामि सुश्रोणि विवाहे वरसुन्दरीम् २८
इत्युक्त्वा स्वगतं धैर्यमवलम्ब्य महासुरः ।
निर्ययौ स्वबिलं रम्यं रत्नरश्मिप्रदीपितम् ॥२९॥
गतमिन्द्ररिपुं दृष्ट्वा प्रद्युम्ने विगतज्वरे ।
ययौ सन्ध्याख्यया मार्धं रन्तुमस्ताचलं रविः ३०

आकर तपोनिधि मेरे पिता से प्रार्थना करो ॥ २५ ॥ उस के उस वचन को सुन कर विस्मय से प्रफुल्ललोचनवाला राजा मोहित मन से बहिन से यह कहने लगा ॥ २६ ॥ हेपुत्रि! चन्द्रावती का मन जिस से अन्यत्र न जाये, ऐसी विधि एक रात के लिए प्रयत्न से करो ॥ २६ ५ कल स्वयं आकर विधिपूर्वक पिताजी से प्रार्थना कर के हेसुश्रोणि! श्रेष्ठ सुन्दरी को विवाह में वरण करूँगा ॥ २८ ॥ इतना कह कर महान् असुर अपने धैर्य का अवलम्बन कर रत्नों के किरणों से प्रदीप्त एवं

विहाय धरणीं तापश्चक्रवाकमनो ययौ ।
बभूव कुङ्कुमाताम्रं वारुणीगगनस्थलम् ॥ ३१ ॥
कमलात्कुमुदं रम्यं निर्ययावलिसंहतिः ।
रुरोध जगदालोकं तिमिरश्च तदा शतैः ॥३२॥
बभूवुर्निद्रया ग्रस्ताः प्राणिनोऽद्रिनिवासिनः ।
रराज भगवांश्चन्द्रः प्रदीप्तधरणीधरः ॥ ३३ ॥
ततोऽङ्कमध्यमारोप्य राजपुत्रीं प्रभावतीम् ।
प्रद्युम्नो रूपिणां श्रेष्ठ इदंवचनमब्रवीत् ॥ ३४ ॥
कान्तिमान् नयनानन्दजननो मतिमोहनः ।
प्रयाति पश्य पूर्णेन्दुस्त्वद्वक्त्रस्योपमां प्रिये ३५

रमणीय अपने बिल में चला गया ॥ २६ ॥ इन्द्र शत्रु को गया देख कर प्रद्युम्न के सन्ताप रहित होजाने पर सूर्य भी सन्ध्या के साथ रमण करने अस्ताचल को चले गये ॥ ३० ॥ धरणी को त्याग कर ताप चकोर के मनमें गया, वरुण दिशाका गगन-स्थल भी कुङ्कम के समान ताम्र वर्ण हो गया ॥ ३१ ॥ भँवरे संकुचित कमलों को छोड कर विकसित रम्य कुमुदों पर गये, और उस समय शनैः२ अन्धकार ने संसार के आलोक को रोक दिया ॥ ३२ ॥ पर्वतवासी समस्त प्राणि गण निद्रा से ग्रस्त हो गये, धरणीतल तथा धरणीधर को चाँदनी से प्रदीप्त करते हुए

संकुचत्पत्रनिकरं विहाय कमलोत्पलम् ।
प्रयाति मधुलिग्माला विकसत्कुमुदोदरम् ३६
भृङ्गराजभराभग्नकेसरं कुमुदं प्रिये ।
पीताधरमिवाभाति रत्यन्ते कामिनीमुखम् ३७
मन्दमारुतविक्षेपैः प्रचलद्भिः सुकोमलैः ।
पल्लवाञ्जलिभिः पुष्पं क्षिपन्ति तरवः प्रिये ३८
स्मितपुष्पोद्गमोपेतं रुचिराधरपल्लवम् ।
भ्रूलतानृत्यललितमुद्यानमिव ते मुखम् ।। ३९ ।।

भगवान् चन्द्रमा विराजमान हुए ।। ३३ ।। ऐसे समय में राजपुत्री प्रभावती को अङ्क में रख कर रूपशालियों श्रेष्ठ प्रद्युम्न ने यह वचन कहा ।। ३४ ।। प्रिये! देखो, कान्तिमान् नेत्रोंका आनन्दजनक मतिको मोहित करनेवाला पूर्ण चन्द्र तुह्मारे मुखका उपमान हो रहा है ।। ३५ ।। संकुचित पत्रोंवाले कमलों को त्याग कर मधुकरों की माला खिलते हुए कुमुदों के कोश में जा रही है ।। ३६ ।। प्रिये! भृङ्गराज के भार से भग्न केसरवाला कुमुद पीताधरोष्ठ रत्यन्त कामिनी के मुखके समान शोभा पा रहा है ।। ३७ ।। प्रिये! मन्द २ चलते मारुत के झोकोंसे प्रचलित सुकोमल पल्लवों की अञ्जलियों से वृक्षलता गण पुष्पांजलि दे रहे हैं ।। ३८ ।। मन्दस्मित के पुष्पविकास से युक्त, रुचिर अधर के पल्लववाला, भ्रूलता के नृत्य से सुललित, तुह्मारा मुख उद्यान

इत्युक्त्वा प्रियवाक्येन प्रियां प्रेमप्रवर्तकः ।
रमाम रुक्मिणीसूनू रम्ये गिरिवरे तदा ॥४०॥

ततः स्फुरत्पद्मपरागपिञ्जरा
तरङ्गमालारुचिरांशुकावृता ।
प्रभावती हंसकलप्रलापिनी
सरोरुहिण्या उपमानतां ययौ ४१

इति श्रीवाग्वतीप्रशंसायां प्रद्युम्नविजये प्रभावतीविनोदनो नाम
दशमोऽध्यायः ॥

पुलस्त्य उवाच —

ततो विवर्णे शशिनि प्रवाति मलयानिले ।
सम्प्राप्तं नारदं दृष्ट्वा प्रद्युम्नो वाक्यमब्रवीत् ॥१॥

के तुल्य है ॥ ३९ ॥ प्रियाको इतना कह कर प्रिय वाक्य से प्रेमप्रवर्तक रुक्मिणी सुत उस समय रम्य गिरिशिखर पर रमण करने लगे ॥ ४० ॥ तदनन्तर विकसित पद्म के पराग से पिञ्जरवर्ण, तरङ्गोंकी मालारूपी रुचिर अंशुक से आच्छन्न, हंसों (नूपुर तथा पक्षी) के कलरव का प्रलाप करनेवाली प्रभावती कमलिनी की उपमान हुई ॥ ४१ ॥ दशम अध्याय समाप्त।

पुलस्त्य बोले— तदनन्तर चन्द्रमा के विवर्ण हो जाने पर, मन्द मलयानिल के चलने पर आये हुए नारद को देख कर

कथं जेयः स देवर्षे दानवेन्द्रः सुदुर्जयः ।
अत्यक्तबालभावेन स्वल्पवीर्येण वै मया ॥ २ ॥
तस्य तद्वचनं श्रुत्वा प्रद्युम्नस्य महात्मनः ।
अब्रवीदीदृशं वाक्यं भगवान् नारदो मुनिः ३
जेष्यसि त्वं महाबाहो दानवेन्द्रं सुदुर्जयम् ।
ब्रह्मणो वचने पुण्ये विपरितं न विद्यते ॥ ४ ॥
ब्रह्मणो वचनादेव दैत्येन्द्रेण दुरात्मना ।
जितं लोकत्रयं पूर्वं लोकपालाभिरक्षितम् ॥५॥
तस्य तद्वचनं श्रुत्वा महर्षेरमितौजसः
कौतुहलपरो भूत्वा प्रद्युम्नो वाक्यमब्रवीत् ॥६॥
कस्मिन्नवसरे लब्धं ब्रह्मणो वचनं शुभम् ।

प्रद्युम्न यह वाक्य बोले ॥१॥ हे देवर्षे! वह दुर्जय दानव कैसे जिता जाय? मैं बालक हूँ तथा दुर्बल हूँ । ॥२॥ उस महात्मा प्रद्युम्न के उस वचन को सुन कर भगवान् नारद मुनि इस प्रकार का वचन बोले ॥ ३ ॥ हे महाबाहो! दुर्जय दानवेन्द्र को तुम जितोगे, ब्रह्मा के पुण्यमय वचन विपरीत नहीं हो सकते ॥४॥ ब्रह्मा के वचन से ही दुरात्मा दैत्येन्द्र ने लोकपालों से सुरक्षित तिनों लोकों को पहले जिता था ॥ ५ ॥ अनुपमतेज वाले उन महर्षि के उस वचन को सुन कर कौतू-

कीदृशेन विधानेन जितं लोकत्रयं पुरा ॥ ७ ॥
स च कस्य सुतो दैत्यः श्रोतुमिच्छाम्यहं मुने ।
ज्ञाता त्वमसि सर्वेषां कार्याणाञ्च तपोधन ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा प्रद्युम्नस्य महात्मनः ।
कथां मङ्गलसंयुक्तां कथयामास नारदः ॥ ९ ॥
राजा बाण इति ख्यातः शोणितापुरसुप्रियः ।
रोहिणी नाम विख्याता देवी तस्य महीपतेः १०
तस्या देव्या विशालाद्या गर्भादेव भयावहः ।
नृपतेस्तनयः श्रीमान् सुषुवेऽसुरसत्तमः ॥ ११ ॥

हल से प्रद्युम्न ने यह वाक्य कहा ॥ ६ ॥ किस समय ब्रह्मा का शुभ वचन प्राप्त किया ? और पहिले किस प्रकार के विधान से त्रिलोकी को जिता ? ॥ ७ ॥ हे तपोधन ! और वह दैत्य किस का पुत्र है ? हे मुनि ! मै सुनना चाहता हूँ । तुम सब कार्यों के ज्ञाता हो ॥ ८ ॥ महात्मा प्रद्युम्न के उस वचन को सुन कर नारद ने मङ्गल सहित कथा का कथन करना प्रारम्भ किया ॥ ९ ॥ शोणितपुर में प्रख्यात राजा बाण था, उस राजा की महारानी विख्यात रोहिणी नाम की थी ॥ १० ॥ विशालनेत्रा उस रोहिणी देवी के गर्भ से ही भयानक उस श्रीमान् राजा बाण का पुत्र असुरोंमें उत्तम उत्पन्न हुआ ॥ ११ ॥

तस्य सञ्जातमात्रस्य प्रचचाल मही तदा ।
स्पन्दतेऽदक्षिणं चक्षुः सहस्राक्षस्य धीमतः १२
सञ्जातविस्मयैः शीघ्रं शास्त्रविद्भिर्महर्षिभिः ।
अग्रे परीक्षितं तस्य लक्षणं देहसंश्रितम् १३
इन्द्रस्य दमनं यस्तु करिष्यति महाबलः ।
इतीन्द्रदमनो नाम ख्यायते शास्त्रदर्शिभिः १४
वीर्येण वयसा चापि बभूवाऽत्यर्थसंश्रितः ।
किमर्थमजिते शक्रे मम नाम तथाविधम् १५
कृतं महर्षिभिरिति लज्जया व्यथितेन्द्रियः ।
सत्त्ववीर्यगुणोपेतस्तपसे कृतनिश्चयः ॥ १६ ॥
स पप्रच्छ गुरुं गत्वा ज्वलन्तं स्वेन तेजसा ।
गुरोर्गुरुतरं वाक्यं श्रुत्वा हृष्टो महासुरः ॥ १७॥

उस समय उस के जन्म लेते ही भूकम्प हुआ और बुद्धिमान् सहस्राक्ष इन्द्र का वाम नेत्र फर फरने लगा ॥१२॥ आश्चर्य से चकित हुए शास्त्रज्ञ महर्षियों ने शीघ्र ही समक्ष में उस के देह के लक्षणों की परीक्षा की ॥ १३ ॥ जो महाबली इन्द्र का दमन करेगा, इसलिए शास्त्रदर्शी लोग इस को इन्द्रदमन (महेन्द्रदमन) कहते हैं ॥ १४ ॥ बल एवं सौन्दर्य का अत्यन्त आश्रय स्वरूप

रुद्रधारोदये तीर्थे चकार नियमैस्तपः ।
वर्षाणां हि सहस्राणि पञ्च चात्र वरेप्सया ॥१८॥
तपसाऽऽराधयामास भगवन्तं त्रिलोकपम् ।
प्रभावात्तपसस्तस्य समाकृष्टो जगद्गुरुः ॥१९॥
विमानेनाऽऽर्कवर्णेनाऽऽविरासीच्चतुराननः ।
ततः सम्भ्रममादाय प्रहृष्टोऽसुरसत्तमः ॥२०॥
ब्रह्माणं वरदं दृष्ट्वा चेदं वचनमब्रवीत् ।
सुरैरजेयमिच्छामि वरं दातुं त्वया प्रभो ॥२१॥

वह शोचने लगा– इन्द्र के दमन किये बिना मेरा नाम महर्षियों ने ऐसा क्यों रखा ? इस प्रकार लज्जा से व्यथितेन्द्रिय आत्म बल शारीरिक बल आदि गुणों से युक्त वह तपस्या के लिए निश्चय कर अपने तेज से प्रज्वलित गुरु के पास जाकर प्रश्न कर के गुरु के गुरुतर वाक्य को सुन कर प्रसन्न महासुर इस रुद्रधारोदय तीर्थ में यम नियम पूर्वक पाँच हजार वर्षों तक बर की इच्छा से तप करता रहा ॥ १५–१६–१७–१८ ॥ तपस्या से त्रिलोकी के पति भगवान की आराधना की, उस के तप के प्रभाव से समाकृष्ट हो कर जगद्गुरु चतुर्मुख ब्रह्मा सूर्य तुल्य विमान से प्रकट हुए। तदनन्तर सहसा वह असुर श्रेष्ठ प्रसन्न हो कर ब्रह्माजीको वरद देख कर यह वचन बोला – हे प्रभो ! इस समय आप यदि सन्तुष्ट हैं तो आप से यही वर चाहता हूँ

त्रैलोक्यविजयं चैव यदि तुष्टोऽसि साम्प्रतम् ।
ततो दैत्यवचः श्रुत्वा भगवांश्चतुराननः ॥२२॥
प्रफुल्लनयनो भूत्वा चेदं वचनमब्रवीत् ।
अजेयस्त्वं सुरैर्भूत्वा किन्तु स्वर्गनिवासिभिः २३
त्रैलोक्यविजयी चैव भविष्यसि महासुर ।
एवं सम्भाष्य तं दैत्यं तपस्थमसुरोतमम् ॥२४॥
विमानेनाऽम्बरतलं विवेश कमलोद्भवः ।
ततो लब्धवरो वीरो वीरनायकवेष्टितः ॥२५॥
परिवार्यासुरगणैरभिषिक्तो रराज ह ।
सामन्तैर्बहुभिः सार्धं मन्त्रिभिश्चानुयायिभिः २६

कि देवता लोग हम को जित न सके और मैं तिनों लोकों को
जित लूं ॥ १९-२०-२१-२२ ॥ उस के वाद दैत्यके वचन श्रवण
कर प्रफुल्लनेत्र भगवान् ब्रह्मा यह वाक्य बोले—तुम स्वर्गवासी
देवों से अजेय हो कर हेमहासुर ! त्रैलोक्य विजयी भी होवोगे,
तपःस्थ उस असुरोत्तम को ऐसा भाषण कर ब्रह्मा ने विमान में बैठ
कर आकाश मण्डल में प्रवेश किया ॥ २३-२४-२५ ॥ उसके पश्चात्
वर प्राप्त कर वह वीर नायकों से युक्त वीर अनेक सामन्त मन्त्री
अनुयायी लोगों के साथ समस्त असुरगणों से राज्य में अभि-
षिक्त हो कर विराजमान हुआ ॥ २६ ॥ उसने इन्द्र की सभा में

कूष्माण्डं प्रेषयामास देवेन्द्रस्य तु संसदि ।
गत्वा शक्रसभामध्ये सत्वरोऽसुरदूतकः ॥२७॥
अब्रवीदीदृशं वाक्यं कूष्माण्डो घोरविक्रमः ।
प्रदत्तं ब्रम्हणा राज्यं मम भर्त्रे पुरन्दर ॥ २८ ॥
राज्यानि वीरभोग्यानि त्यक्तुमस्मात्त्वमर्हसि ।
दूतस्य वचनं श्रुत्वा रोषाद्रक्तविलोचनः ॥२९॥
अब्रवीदीदृशं वाक्यं भगवान् पाकशासनः ।
राज्यं त्यक्तुं न पश्यामि विना युद्धेन दानव ३०
राज्यानि वीरभोग्यानि वीर्यं तद्द्रष्टुमर्हसि ।
इत्युक्तस्य सुरेन्द्रस्य वाक्यं सङ्ग्रामसूचकम् ३१

कूष्माण्ड नामक असुर को राजदूत कर भेजा, और तुरन्त ही वह घोरविक्रम कूष्मान्ड दूत इन्द्र सभा में जा कर इस प्रकार के वचन बोला— हेइन्द्र ! ब्रह्मा ने राज्य मेरे राजा को दिया है, राज्यों का भोग वीर ही कर सकते हैं (वीरभोग्या वसुन्धरा) इस लिए तुम छोड दो ॥ २७-२८-२९ ॥ दैत्य दूत के वचन सुन कर रोष से रक्तनेत्र भगवान् इन्द्र इस प्रकार के वचन बोले ॥ ३० ॥ हेदानव! विना युद्ध के राज्य को त्याग देने का कोई कारण नहीं देखता हूँ । हाँ, राज्य वीर भोग्य अवश्य है, तुम वीर्य देख सकते हो ॥ ३१ ॥ इस प्रकार इन्द्र के संग्राम सूचक

कथयामास सम्प्राप्तो दूतो दैत्येन्द्रसंसदि ।
स्वदूतवचनं श्रुत्वा ज्वलत्कोपानलाकुलः ॥३२॥
उद्योगस्य समारम्भं चकाराऽसुरसत्तमः ।
ततस्तस्मिन् क्षणे पुण्ये प्रहतोद्योगदुन्दुभौ ३३
सम्प्राप्ते भगवान् शक्र इदं वचमब्रवीत् ।
जयार्थेनाऽऽत्मनो वीरं भ्रातरं कच्छपासुरम् ३४
पुरस्कृत्य प्रयातव्यं शंखं शंखसमस्वनम् ।
तस्य नादेन घोरेण महीकम्पप्रदायिना ॥३५॥
जायते समरे नूनं रिपूणां मतिविभ्रमः ।
जित्वा शीघ्रं दुरात्मानं सुरेन्द्रं समराध्वरे ३६

वाक्य सुन कर दैत्येन्द्र की सभा में आकर दूत ने कह दिया ॥ ३२ ॥ अपने दूत के वचन सुन कर कोपाग्नि से जाज्वल्यमान असुर राज ने युद्ध के उद्योग का प्रारम्भ किया ॥ ३३ ॥ तदनन्तर उस शुभ मुहूर्त में रण-भेरी बजाकर भगवान् इन्द्र के सज्जित हो जाने पर दैत्यराज अपने विजय के लिए अपने भाई कच्छपासुर को यह वचन बोला ॥ २४ ॥ शंख के समान स्वर वाले शंखासुर को आगे कर युद्ध में जाओ, भूकम्प करने वाले उस के घोर नाद से समर में शत्रुवों का अवश्य मतिभ्रम होगा और शीघ्र दुरात्मा सुरेन्द्र को युद्धयज्ञ मे जितकर

पूरणीयस्त्वया पुत्र पूर्वजानां मनोरथः ।
इत्युक्त्वा गुरुणा शीघ्रं दत्ताशीर्दैत्यसत्तमः ३७
निर्ययौ स्वबलैः सार्धं मेरुपृष्ठं मनोरमम् ।
त्वरेण मेरुमासाद्य स्वसैन्यपरिवारितः ॥ ३८ ॥
युद्धाय प्रार्थयामास सुरेन्द्रं स महासुरः ।
रिपोरागमनं ज्ञात्वा देववृन्दपुरःसरः ॥ ३९ ॥
निर्ययौ भगवानिन्द्रो योद्धुं युद्धविशारदः ।
ततः पपात सहसा शरवृष्टिर्निरन्तरम् ॥ ४० ॥
ननाद रणकुञ्जौघः प्रवेश सह पुष्करः ।
हस्तिनां क्रौञ्चरावैश्च हेषितैश्चापि वाजिनाम् ४१

हेपुत्र ! तुम को पूर्वजों का मनोरथ पूर्ण करना चाहिए ॥ ३५-३६-३७॥ इतना कह कर गुरुजनों का आशीर्वाद लेकर दैत्यसत्तम अपने सैनिकों के साथ निकल कर तुरन्त सुमेरु शिखर में पहुँच कर उस महासुर ने सुरेन्द्र को युद्ध के लिए हाँक दिया ॥ ३८-३९ ॥ शत्रु का आगमन जान कर देववृन्द को आगे कर युद्धविशारद भगवान् इन्द्र युद्ध करने के लिए निकले ॥ ४० ॥ तत्काल सहसा निरन्तर बाणवृष्टि हुई, प्रलयकालिक मेघों के समान रणरव होने लगा, हाथियों के क्रौञ्चराव, घोडों के हेषाराव तथा दैत्यों की गर्जनाओं से

बभूव तुमुलं घोरं गर्जितैश्चाऽमरद्विषाम् ।
तस्मिन्नवसरे घोरे रिपुचित्तविदारिणा ॥ ४२ ॥
ननादाऽतिशयं शंखः स्वरेण समरान्तरे ।
ततो वेगाद्विनिष्पत्य रथेन रथमूर्धनि ॥ ४३ ॥
केशं जग्राह शक्रस्य सोऽसुरः क्रोधमूर्च्छितः ।
ततस्तस्य भयात्त्रस्तो मुक्तकेशोऽमराधिपः ४४
तत्क्षणात्स्वरथं त्यक्त्वा विवेश गगनस्थलम् ।
ततस्तस्मिन् क्षणे घोरे दानवा घोरविक्रमाः ४५
पुरन्दरपुरं भेत्तुं चक्रिरे विस्मयाकुलाः ।
ततस्तास्मिन् क्षणे प्राप्तो विमानेन चतुर्मुखः ४६

तुमुल एवं घोर युद्ध हुआ ॥ ४१-४२ ॥ उस घोर शत्रुवों के चित्त को विदीर्ण करने वाले अवसर में समरभूमि में शंखासुर शंख के समान अत्यन्त नाद करने लगा ॥ ४३ ॥ तत्काल वेग से रथ से रथ के शिखर पर कूद कर उस असुर ने क्रुद्ध होकर इन्द्र के केशों में पकड लिया ॥ ४४ ॥ उस के वाद उस के भय से त्रस्त होकर खुले केशों से इन्द्र तत्क्षण में अपने रथ को त्याग कर गगन स्थल में घुस गये ॥ ४५ ॥ उस के अनन्तर उस घोर समय में घोर विक्रम वाले दानव लोग विस्मित होकर पुरन्दर की अमरावतो को

रणे विजयिनं वीरं दैत्येन्द्रमिदमब्रवीत् ।
भेत्तुं नलभ्यते दैत्य ममतेजोऽभिरक्षितम् ४७
पुरन्दरपुरं रम्यमन्यैरप्यमरादिभिः ।
परा प्रांशुर्भवेत्कीर्तिर्जयेनाऽनेन मानद ॥ ४८ ॥
तवेन्द्रदमनो नाम सत्यमद्य प्रवर्तते ।
मयेनाऽसुरमुख्येन पूर्वकाले विनिर्मितम् ॥४९॥
बिलमस्ति महाबाहो जठरे चन्दनागिरेः ।
तस्मिन् निवससि स्वेच्छं हेराजन् राजलीलया ५०
विविधोपद्रवग्रस्ते न त्वं स्वर्गे निवत्स्यसि ।
स्वर्गादादाय रत्नानि चित्राणि च बहूनि च ५१

ध्वस्त करने के लिए तैयार हुए ॥ ४६ ॥ उसी समय में विमान पर बैठ कर चतुर्मुख ब्रह्मा ने युद्ध में विजयी वीर को यह कहा ॥ ४७ ॥ हे दैत्य ! मेरे तेज से सुरक्षित स्वर्गपुरी का भेदन करने को तो देवताओं को भी नहीं मिलेगा ॥ ४८ ॥ हे मानद ! इस विजय से तुह्मारी परम उत्कृष्ट कीर्ति होगी, आज तुह्मारा नाम यथार्थ इन्द्रदमन हुआ ॥ ४९ ॥ हे महावाहो ! चन्दनागिरि (चन्द्रगिरि = चितलाङ्) के गर्भ में पूर्व काल में असुरमुख्य मय दानव ने बनाया हुआ बिल है ॥ ५० ॥ हे राजन् ! राजलीला करते हुए उस बिल में स्वेच्छा से

मर्त्यलोकं प्रयातव्यं शासनान्मम मानद ।
एवं सम्भाष्य दैत्येन्द्रं प्रस्थाप्य धरणीतलम् ५२
सुरेन्द्रं रणविध्वस्तं भगवानिदमब्रवीत् ।
प्रादुर्भूते शचीनाथ मथुरायां मधुद्विषि ॥ ५३ ॥
तस्य पुत्रो महावीरः प्रद्युम्न इति विश्रुतः ।
द्वारकायां यदा जातो मधुकामांशसम्भवः ५४
कालशम्बरपूर्वेण स हनिष्यति ते रिपुन् ।
पुराकृतं तु यत्कर्म त्वया तदनुभूयते ॥ ५५ ॥
त्यक्तव्यमस्माद्वैराग्यं सर्वमेव ममाऽऽज्ञया ।
एवं सम्भाष्य नाथेन ब्रह्मणा भूरितेजसा ॥५६॥

निवास करो, अनेक उपद्रवों से ग्रस्त इस स्वर्ग में तुम निवास नहीं कर सकोगे ॥ ५१ ॥ हे मानद ! स्वर्ग से विचित्र बहुत से रत्नों को लेकर मेरे शासन से मर्त्यलोक में चले जावो ॥ ५२ ॥ इस प्रकार दैत्येन्द्र को समझा बुझा कर भूमण्डल में भेज कर भगवान् ब्रह्मा रण में हारे हुए इन्द्र से यह कहने लगे ॥ ५३ ॥ हे शचीनाथ ! मुथुरा में मधुसूदन के प्रकट हो जाने पर, उन का पुत्र महान वीर प्रसिद्ध प्रद्युम्न द्वारका में जव वसन्त एवं कामदेव के अंश से उत्पन्न होंगे वह तुह्मारे काल शम्बर प्रमुख वैरियों को मारेंगे ॥ ५४-५५ ॥

अभिषिक्तः सहस्राक्षः प्रविवेशाऽमरावतीम् ।
ततो रसातलं रम्यं प्रविवेश महासुरः ॥ ५७ ॥
गर्जद्भिश्च प्रनृत्यद्भिः स्वसैन्यैः परिवारितः ।
रसातलं प्रविष्टे तु दानवे युद्धदुर्मदे ॥ ५८ ॥
दुद्रुवुः शरणं सर्वे पन्नगाः पन्नगेश्वरम् ।
पन्नगानां हितार्थेन वासुकिर्भुजगाधिपः ॥५९॥
दत्त्वा रत्नान्यनेकानि दैत्येन्द्रमिदमब्रवीत् ।
जितं पूर्वं भवत्कीर्त्या सर्वमेव रसातलम् ॥६०॥
जेतुं नापेक्षते राजन् पुनरागत्य विग्रहैः ।
तस्य तद्वचनं श्रुत्वा दत्वाऽर्घाणि बहूनि च ॥६१॥

जो कर्म पूर्व जन्म में किया था, तुम उसी का फल भोग रहे हो, इस लिए मेरी आज्ञा से सभी वैराग्य छोड दो ॥ ५६ ॥ इस प्रकार भाषण कर प्रशस्त तेजस्वी लोकनाथ ब्रह्मा ने सहस्रनेत्रवाले वज्रपाणि इन्द्र को पुनः राज्याभिषेक दिया, तदनन्तर इन्द्र ने अमरावती में प्रवेश किया ॥ ५७ ॥ गर्जते हुए नाचते हुए अपने सैनिकों के साथ उस के अनन्तर महासुर महेन्द्रदमन ने रम्य रसातल में प्रवेश किया ॥ ५८ ॥ युद्धदुर्मद उस दानव के रसातल में प्रनेश करते ही सत्र नाग नागेश्वर वासुकि के शरण में गये ॥ ५९ ॥ सर्पों के हित के लिए सर्पराज वासुकि ने अनेक रत्न देकर दैत्येन्द्र से यह कहा

रत्नान्याय दैत्येन्द्रो मर्त्यलोकं समाययौ ।
मर्त्यलोके च भूपालान् जित्वा सर्वान् पृथक् पृथक्६२
वस्त्राभरणरत्नानि दत्त्वाऽर्घाणि समाददे ।
ततो मन्त्रं समालोच्य मन्त्रिभिः सहसोऽसुरः ६३
विश्वकर्माणमादिश्य निर्ममे भवनोत्तमम् ॥
रुरोध वाग्वतीं चैव चन्दनागिरिमालया ।
सेतुसंरक्षणे शंखं स्थापयामास सादरम् ॥६४॥
आदिदेश निवासाय विराधं वाग्वतीजले ।
स्वसा प्रभावती चापि यथाकामं प्रवर्तिता ॥६५॥

आप की कीर्ति ने पूर्व ही रसातल को जित लिया है, हे राजन् ! आकर युद्धों से जितने की आवश्यकता नहीं है ॥ ६०–६१ ॥ उस के उस वचन को सुन कर बहुत सा मूल्य देकर रत्नों को लेकर दैत्येन्द्र मर्त्यलोक में चला आया ॥ ६२ ॥ मर्त्यलोक में अलग २ राजाओं को जित कर मूल्य देकर वस्त्र अलङ्कार रत्नों को लिया ॥ ६३ ॥ उस के वाद उस असुर ने मन्त्रियों के साथ मन्त्रणा कर विश्वकर्मा को आदेश देकर उत्तम भवन बनाया ॥ ॥६४ ॥ एवं चन्दनागिरि की माला से वाग्वती को रोक कर बाँध की रक्षा के निमित्त आदरपूर्वक शंखासुर को नियुक्त किया ॥ ६५ ॥ वाग्वती जल में निवास

कन्याशतं समाहृत्य विवाहेन महासुरः ।
विवेश भवनं रम्यं सुप्रभानामविश्रुतम् ॥ ६६ ॥
हेमवेश्मसमाकीर्णे रत्नतोरणशोभिते ।
तडागोद्यानरुचिरे बिलेऽस्मिन् सुमनोरमे ६७
कामिनीभिः सह स्वेच्छं सततं राजलीलया ।
बुभुजेऽतिचिरं सौख्यं सोऽसुरो देवदुर्जयः ६८
ब्रह्मणो वचनात्तत्र विपरीत न विद्यते ।
ब्रह्मणो वचनादेव जेष्यते नियतं त्वया ॥ ६९ ॥
इत्युक्तवति देवर्षौ दिदीपे शिखरे गिरेः ।
पद्मरागशलाकाभिरिवरश्मिभिरंशुमान् ॥७०॥

करने के लिए विराधासुर को आदेश दिया, अपनी वहिन प्रभावती को स्वच्छन्द विहार करने की आज्ञा देकर एक सौ कन्याओं के साथ विवाह कर लेकर उस महासुर ने रमणीय सुप्रभाराजधानी (चितलाङ) के रम्य राजभवन में प्रवेश किया ॥ ६५-६६ ॥ सुवर्णमय गृहों से परिपूर्ण, रत्नमय तोरणों से सुशोभित, वापी कूप तडाग उद्यान आदि से मनोहर, इस बिल (राजभवन) में सदा कामिनी गणों के साथ स्वेच्छा से राजलीला करते हुए चिरकाल पर्यन्त देवताओं से दुर्जय उस महासुर महेन्द्रदमन ने सुख भोगा ॥ ६७-६८॥ ब्रह्मा के

ततो मुनेर्वाक्यविबुद्धमानसं
विलोलहारं हरिचित्तनन्दनं ।
रराज कन्दर्पवपुः प्रभावती-
भुजद्वयालिङ्गनबन्धनच्युतं ॥७१॥

इति श्रीवाग्वतीप्रशंसायां प्रद्युम्नविजये नारदालापो नामैकादशोऽध्यायः ॥

पुलस्त्य उवाच—

ततः प्रहृष्टहृदयां हर्षाद्रोमाञ्चितां प्रियाम् ।
अब्रवीदीदृशं वाक्यं श्रीमान् मकरकेतनः ॥१॥

वचन से वहाँ विपरीत नहीं हो सका, ब्रह्मा के ही वचन से तुम उस को अवश्य जितोगे ॥ ६९ ॥ देवर्षि के इतना कहने पर पर्वत के शिखर पर पद्मरागमणि की शलाकाओं के तुल्य किरणों से अंशुमाली भगवान् सूर्य देदीप्यमान हुए ॥ ७० ॥ उस के अनन्तर मुनि के वाक्य से प्रबुद्ध मन वाले प्रद्युम्न का चञ्चल हार वाला, हरि के चित्त को आनन्द देनें वाला, प्रभावती के दो भुजावों के बन्धन से छुटा हुआ कामदेव का शरीर विराजमान हुआ ॥ ७१ ॥

एकादश अध्याय समाप्त ।

पुलस्त्य बोले— उस के वाद प्रसन्नहृदयवाली हर्ष से रोमाञ्चित प्रिया को श्रीमान् मीनकेतु प्रद्युम्न इस प्रकारका

पतिव्रते त्वया देवि क्रियतां मम मङ्गलम् ।
महर्षेर्वचनं चैव श्रुतं ते कमलानने ॥ २ ॥
ततः प्रभावती देवी बाष्पपूर्णविलोचना ।
मङ्गलं रचयामास पत्युर्ज्जयविधायिनी ॥ ३ ॥
मङ्गलं रचितं दृष्ट्वा देव्या मकरकेतनम् ।
अब्रवीदीदृशं वाक्यं नारदो मुनिसत्तमः ॥ ४ ॥
त्वत्पिता भगवान् विष्णुः शंखचक्रगदाधरः ।
अद्य त्वद्विजयं द्रष्टुं गरुडेनाऽऽगमिष्यति ॥५॥
तवैव विजयं द्रष्टुं प्रहृष्टैस्त्रिदशैः सह ।
आगमिष्यति तत्रैव भगवान् पाकशासनः ॥६॥

वचन बोले ॥ १ ॥ हे देवि ! हे पतिव्रते ! तुम मेरा मङ्गल करो, हे कमलानने ! महर्षि का वचन तुमने सुन लिया है ॥ २ ॥ इतना सुन कर प्रभावती देवी ने आँखों में आँसु भर कर पतिदेव के जय के लिए मङ्गलाचार किया ॥ ३ ॥ देवी के द्वारा मङ्गलरचना सम्पन्न देख कर मुनिश्रेष्ठ नारद मकरध्वज प्रद्युम्न से यह कहने लगे ॥ ४ ॥ शंख चक्र गदा धारी गरुडारूढ तुह्मारे पिता भगवान् विष्णु आज तुह्मारा विजय देखने आयेंगे ॥ ५ ॥ तुह्मारा ही विजय देखने के लिए प्रसन्न देवगणों के साथ भगवान् पाकशासन इन्द्र भी वहीं पर

शंखो नाम दुराधर्षः शंखदुन्दुभिनिस्वनः ।
सेतुं संरक्ष्य यत्नेन तिष्ठते देवकण्टकः ॥ ७ ॥
बलात्पादेन संपीड्य जयार्थेना ऽऽत्मनस्त्वया ।
पूरणीयो दुराचारो यथाऽसौ स्यान्महास्वनः ॥८॥
तस्य नादेन घोरेण वज्रनिर्ह्रादवर्चसा ।
भविष्यति महाँस्त्रासो दानवानां दुरात्मनाम् ९
हत्वा दैत्यं दुरात्मानं सानुजं राज्यदर्पितम् ।
पूरणीयस्त्वया पुत्र देवेन्द्रस्य मनोरथः ॥१०॥
इत्युक्त्वा मुनिना शीघ्रं जयाशीःसम्प्रपूजितः ।
निर्ययौ रुक्मिणीसूनू रम्यं शंखालयं गिरिम् ११

पधारेंगे ॥ ६ ॥ शंख एवं दुन्दुभि के समान भयङ्कर निनाद वाला दुर्धर्ष देवकण्टक शंखासुर यत्नपूर्वक सेतु (बाँध) की रक्षा कर रहा है ॥ ७ ॥ तुम अपने विजय के लिए पाँव से बलात् दबा कर उस दुराचार को फुँकों, जिस से महान् शब्द हो ॥ ८ ॥ उस के वज्रपात के तुल्य घोर निनाद से दुरात्मा दानवों को महान त्रास होगा ॥ ९ ॥ हे पुत्र! राज्यमद से अहङ्कारी भाई सहित दुरात्मा दैत्य महेन्द्रदमन को मार कर देवेन्द्र का मनोरथ पूर्ण करो ॥ १० ॥ इस प्रकार कह कर शीघ्र मुनि के द्वारा जय के आशीर्वाद से सम्यक्

स्थित्वा शंखबिलद्वारे कृतनादो महाबलः ।
सेतोर्विदारणारम्भं चकार मकरध्वजः ॥ १२ ॥
ततः शंखो विनिष्क्रम्य स्वबिलाद् बलदर्पितः ।
अब्रवीदीदृशं वाक्यं दंष्ट्रोद्दीप्तविलोचनः ॥१३॥
कस्याऽऽज्ञया त्वया क्रूर मम वीर्याभिरक्षितम् ।
अगम्यं त्रिदशैर्वापि क्रियते सेतुदारणम् १४
इत्युक्त्वा सहसा दैत्यो रक्तास्यो रक्तमूर्धजः
तलेनाऽऽहत्य प्रद्युम्नं चकार मतिविह्वलम् ॥१५॥
ततः क्षणात्समुत्थाय बाहुयुद्धेन दानवम् ।
भूमौ निपातयामास प्रद्युम्नो बलिनां वरः १६

पूजित होकर रुक्मिणीपुत्र रमणीय शंखालय पर्वत को चले ॥ ११ ॥ जाकर महाबली प्रद्युम्न ने शंखासुर के बिल के द्वार में खडे होकर सिंहनाद कर बाँध तोडना प्रारम्भ किया ॥ १२ ॥ इतने में प्रदीप्त दाँत तथा नेत्रवाला बल से गर्वित शंखासुर अपने बिल से निकल कर इस प्रकार बोला ॥ १३ ॥ हे क्रूर ! किस की आज्ञा से तुमने मेरे वीर्य से सुरक्षित देवताओं के भी अगम्य सेतु का विदारण करना प्रारम्भ किया ? ॥ १४ ॥ इतना कह कर रक्तमुख रक्तकेश वाले दैत्य ने सहसा प्रद्युम्न को तलप्रहार से मूर्च्छित कर दिया ॥ १५ ॥ तदनन्तर

भूमौ निपतितं शंखं विष्णुशंखसमस्वनम् ।
पादेनाऽऽक्रम्य जठरे पुपूरेऽतिशयं तदा ॥१७॥
शंखनादेन घोरेण प्रबुद्धः कच्छपासुरः ।
जलान्निष्क्राम्य वदनं ननादाऽतिशयं भयात् १८
ततो विराधं घनघोरनिस्वरं
महामुखं मण्डललोचनद्वयम् ।
ददर्श वीरो मधुसूदनात्मजो
जलोशितं शैलसमानविग्रहम् ॥ १९ ॥

इति श्रीवाग्वतीप्रशंसायां प्रद्युम्नविजये विराधदर्शनो नाम
द्वादशोऽध्यायः ॥

क्षण भर में उठ कर बलियों महाबली प्रद्युम्न ने बाहु युद्ध से दानव को भूमि पर गिरा दिया ॥१६॥ भूमि पर पडे विष्णु शंख के समान शब्द करते हुए शंखासुर को पेट में लात से दवा कर उस समय अतिशय बल से फूँका ॥१७॥ भयङ्कर शंख के नाद से जागा हुआ कच्छपासुर जल से शिर निकाल कर भय से चीत्कार करने लगा ॥१८॥ इतने में घनघोर गर्जना करते हुए विशाल मुखवाले मण्डलाकार दो नेत्र वाले शैलतुल्य शरीर वाले जल में वैठे विराध दैत्य को मधुसूदनपुत्र वीर प्रद्युम्न ने देखा ॥१९॥

द्वादश अध्याय समाप्त।

पुलस्त्य उवाच—

ततः शंखनिनादेन विराधस्य स्वनेन च ।
बिलं प्रकम्पितं दृष्ट्वा किमिदं कृतसम्भ्रमः ॥१॥
परिशङ्क्य रिपोः किञ्चिद् भयं भयविधायिभिः ।
निमित्तैः सहसा राजा खड्गबाणधनुर्धरः ॥ २ ॥
सम्बद्धकवचैर्घोरैर्योधैः कतिपयैर्वृतः ।
शैलशृङ्गप्रतीकाशो भिन्नवैदूर्यसप्रभः ॥ ३ ॥
अविरोधितवैरीको विराधाख्यं ममाऽनुजम् ।
विरोधयति दुर्बुद्धिरित्युक्त्वा क्रोधमूर्च्छितः ४
निष्क्रम्य स्वबिलात्तस्थौ श्रीमानसुरसत्तमः ।

पुलस्त्य बोले— इस के अनन्तर शंखासुर के शंखनाद से तथा विराध के घनघोर निनाद से बिल को कम्पित हुआ देख कर 'यह क्या हुआ ?' ऐसा आतङ्कित होकर शत्रुका भयदायक अनेक निमित्तों से कुछ शङ्कित होकर सहसा राजा महेन्द्रदमन खड्ग धनुष बाण लेकर कवच बाँधे हुए कतिपय वीर योद्धाओं के साथ शैलशिखर के तुल्य विशाल शरीर वाला विदीर्ण वैडूर्यमणि समान कान्तिवाला अब तक जिस के साथ किसी वैरीने विरोध करने का साहस नहीं किया था, वह मेरे भाई विराध के साथ किस दुर्बुद्धि ने विरोध किया ?' इतना कह कर क्रोध से चूर होकर अपने बिल से निकल

समक्षे पतितं शत्रुं निर्दहन्निव तेजसा ॥ ५ ॥
ततो विरोधितं त्यक्त्वा विराधं कूर्मरूपिणम् ।
दैत्येन्द्राभिमुखं तस्थौ रथमारुह्यं कैशविः ॥६॥
प्रत्यक्षमागतं दृष्ट्वा प्रद्युम्नं युद्धकांक्षिणम् ।
अब्रवीदीदृशं वाक्यं श्रीमानसुरसत्तमः ॥ ७ ॥
कस्याऽऽज्ञया त्वया क्रूर बाध्यते मम कच्छपः ।
कस्य पुत्रोऽसि मूढ त्वं ज्ञातुमिच्छामि तत्त्वतः ८
कस्य तद्वचनं श्रुत्वा दैत्येन्द्रस्य महात्मनः ।
अब्रवीदीदृशं वाक्यं प्रद्युम्नो बलिनां वरः ॥९॥

कर असुरों के नेता आकर खडा होगया ॥ १–२–३–४–५ ॥ इस के वाद सम्मुख गिरे हुए शत्रु को तेज से मानों भस्मसात् करते हुए पूर्वविरोधित कूर्मरूपी विराध दैत्य को त्याग कर प्रद्युम्न रथ पर चढ कर दैत्यराज महेन्द्रदमन के समक्ष खडे हो गये ॥ ६ ॥ युद्धकांक्षी प्रद्युम्न को प्रत्यक्ष आये हुए देख कर श्रीमान् असुरराज इस प्रकार का वाक्य बोला ॥ ७ ॥ हेक्रूर ! किस की आज्ञा से तू मेरे कच्छप को बाधा देता है ? हेमूढ ! तू किस का पुत्र है ? ठीक २ जानना चाहता हूँ ॥ ८ ॥ उस महात्मा दैत्यन्द्र के उस वचन को सुन कर बलियों में प्रबल प्रद्युम्न इस प्रकार का वाक्य बोले ॥ ९ ॥

निपातितो मया शंखः शंखदुन्दुभिनिस्वनः ।
विराधं पातयिष्यामि दुरात्मानं जलोषितं १०
प्रद्युम्न इति विख्यातो विष्णोर्भगवतः सुतः ।
प्राप्तो युष्मद्विनाशाय देवेन्द्रस्य शुभाज्ञया ११
तस्य तद्वचनं श्रुत्वा रोषाद्रक्तविलोचनः ।
अब्रवीदीदृशं वाक्यं विहस्याऽसुरसत्तमः ॥१२॥
यदि केशवपुत्रस्त्वं सम्प्राप्तो भद्रकं कृतम् ।
चिरकालं मया ध्यातं लब्धं सन्दर्शनं तव १३
त्वां विलोक्य रणे सुप्तं रुधिरेण परिप्लुतम् ।
शम्बरस्य बधोद्भूतो मन्युरद्य प्रशाम्यति १४

मैने शंख दुन्दुभि समान शब्द वाले शंखको गिरा दिया अब जलस्थित दुरात्मा विराधको भी मारूंगा, मैं भगवान् विष्णु का पुत्र प्रख्यात प्रद्युम्न हूं, देवेन्द्र की शुभ आज्ञा से तुम लोगों के विनाश के लिए आया हूँ ॥ १०-११ ॥ प्रद्युम्न के ये वचन सुन कर रोष के मारे रक्तनेत्र वह महेन्द्रदमन इस प्रकार हँस कर बोला ॥ १२ ॥ यदि तुम केशव के पुत्र हो और यहाँ आये तो, भला किया, चिरकाल से मेरा अभिलषित तुम्हारा दर्शन मिला ॥ १३ ॥ रक्त से लथ पथ होकर युद्ध भूमि में सोये हुए तुम को देख कर शम्बर के

इत्युक्त्वा दशनैस्तीव्रैरधिपीड्याऽधरं स्वकम् ।
ववर्ष शरवर्षौघं श्रीमानसुरसत्तमः ॥ १५ ॥
ततस्तस्मिन्क्षणे शीघ्रं प्रद्युम्नोऽपि महावलः ।
अब्रवीदीदृशं वाक्यमुदितादित्यसन्निभः ॥१६॥
त्वां निपात्य दुरात्मानं त्रिदशाधिपकण्टकम् ।
चन्द्रावत्या विवाहं च निर्विघ्नं वर्तयाम्यहम् १७
इत्युक्त्वा रुक्मिणीसूनुः कृतगाण्डीवमण्डलः ।
मुमोच सहसा बाणं रुक्मपुंखविभूषणम् ॥१८॥
ततस्तस्मिन् क्षणे पुण्ये वर्तमाने रणोत्सवे ।
गरुडेनाऽऽययौ विष्णुः शंखचक्रगदाधरः ॥१९॥

वध से उत्पन्न क्रोध आज शान्त होगा ॥ १४ ॥ इतना कह कर दातों से जोर से अपने ओष्ठको दवा कर श्रीमान् असुरराज वाणवर्षा करने लगा ॥ १५ ॥ उस के वाद उस समय महावली वालभास्करकान्तिवाले प्रद्युम्न ने शीघ्र ही इस प्रकारका वाक्य वोले ॥ १६ ॥ देवकण्टक दुरात्मा तुम को भी मार कर निर्विघ्न चन्द्रावती का विवाह भी करूँगा ॥ १७ ॥ रुक्मिणीपुत्र ने इतना कह कर गाण्डीव धनुषको मण्डलाकार कर सुवर्णपुंख भूषण वाला वाण सहसा छोडा ॥ १८ ॥ इसी पुण्य क्षण में जब कि रणोत्सव का प्रारम्भ ही होरहा था, शंख चक्र गदा धारी

प्रहृष्टैस्त्रिदशैः सार्धमप्सरोगणवेष्टितः ।
पूजार्थं रुक्मिणीसूनोः सम्प्राप्तस्त्रिदशेश्वरः २०
ततो मुमोच दैत्येन्द्रो ज्वलत्कोपानलाकुलः ।
अघोरं च विघोरं च रौरवं च शिलीमुखम् २१
उमामुखं विडालास्यं रुद्रकिंकिणिभिः शरैः ।
तच्छरं वारयामास प्रद्युम्नोऽपि महावलः ॥२२॥
गृध्रकंकमुखं चाऽपि काकोलूकमुखं शरम् ।
मुमोच स महाबाहुः श्रीमानसुरसत्तमः ॥२३॥
व्याघ्रसिंहशृगालास्यैः श्वानवक्त्रैः शिलीमुखैः ।
तच्छरं वारयामास प्रद्युम्नो बलिनांवरः ॥२४॥

भगवान् विष्णु गरुड पर सवार हो कर पधारे ॥ १९ ॥ इसी समय प्रसन्नचित्त समस्त देवगणों तथा अप्सरागणों के साथ रुक्मिणी पुत्र की वीरपूजा करने के लिए महेन्द्र भी आये ॥ २० ॥ उस के वाद जाज्वल्यमान क्रोधाग्नि से आकुल व्याकुल दैत्येन्द्र ने अघोर विघोर और रौरव नाम के अस्त्रों का प्रयोग किया ॥ २१ ॥ उमामुख विडालास्य आदि रुद्रकिंकिणी प्रभृति शरों से प्रहार किया, महाबली प्रद्युम्न ने भी उसी प्रकार उस के शरों को रोका ॥ २२ ॥ फिर उस महावाहु असुरराज ने गिद्ध कंक आदि मुख वाले काक उल्लू आदि

एकैकेनाऽस्त्रमुख्येन चैकैकमसुरं तदा ।
पातयामास प्रद्युम्नस्तत्क्षणात्समरान्तरे ॥२५॥
स्तोकावशिष्टं स्वबलं प्रसमीक्ष्य महासुरः ।
प्रद्युम्नस्य विनाशाय नागास्त्रं सन्दधे तदा २६
ततो मुमोच सहसा श्रीमानसुरसत्तमः ।
विषाग्निज्वलिताकाशं नागास्त्रं घोररूपिणम् २७
नागास्त्रं पतितं दृष्ट्वा विषवह्निकलापिनम् ।
हाहाकृतरवैर्देवैः पुपूरे गगनं तदा ॥ २८ ॥
नागास्त्रदग्धः प्रद्युम्नः पतितोमति विह्वलः ।

मुख वाले शरों को छोडा ॥२३॥ महावली प्रद्युम्न ने भी व्याघ्र सिंह श्याल कुक्कुर आदि मुखवाले बाणों से शत्रु के शरों को रोका ॥२४॥ उस समय एक २ मुख्य वाण से महेन्द्रदमन के एक २ मुख्य २ असुर को रणाङ्गण में तत्क्षण प्रद्युम्न ने मार दिया ॥२५॥ उस अवसर पर महेन्द्रदमन ने अपनी सेना को स्वल्प अवशिष्ट देख कर प्रद्युम्न के नाश के लिए नागास्त्र का सन्धान किया ॥२६॥ तव असुर श्रेष्ठ ने सहसा विषाग्नि से आकाश को प्रज्वलित करने वाले घोररूपी नागास्त्र का प्रयोग किया ॥२७॥ विषाग्नि कलाप से वेष्टित नागास्त्र को आते देख कर देवताओं के हाहाकार से गगनमण्डल गूँज उठा ॥ २८ ॥ नागास्त्र से दग्ध मूर्च्छित होकर

पक्षपातेन तार्क्ष्यस्य लब्धचेता बभूवह ॥ २९ ॥
नागास्त्रं च दुराधर्षं तार्क्ष्यसम्पर्कपीडितम् ।
पपात सहसा भूमौ खण्डखण्डमनेकधा ॥ ३० ॥
ततस्तस्मिन् क्षणे पुण्ये प्रद्युम्नं प्राप्य सत्वरः ।
अब्रवीदीदृशं वाक्यं भगवान् नारदो मुनिः ३१
ब्रह्मणा भाषितं पूर्वं स्मर वाक्यं जनार्दने ।
मागा विह्वलतां वीर पुत्रोऽसि मधुविद्विषः ३२
शस्त्रं नापेक्षते जेतुं हीनशस्त्रो भवद्रिपुः ।
मुष्टिमुद्यम्य वेगेन हन्यतां तस्य मूर्धनि ॥ ३३ ॥
तस्य तद्वचनं श्रुत्वा वेगान्निष्पत्य कैशविः ।
मुष्टिमुद्यम सहसा शिरस्येनमताडयत् ॥ ३४ ॥

गिरे हुए प्रद्युम्न गरुड के पक्षों के वायु से सचेत हुए ॥ २९ ॥ दुर्धर्ष नागास्त्र भी गरुडसम्पर्क से पीडित होकर सहसा खण्ड २ होकर भूमि पर गिर पड़ा ॥ ३० ॥ तदनन्तर उस पुण्य समय में तुरन्त प्रद्युम्न के पास आकर भगवान् नारद मुनि इस प्रकार का वचन बोले ॥ ३१ ॥ हेजनार्दनपुत्र ! पूर्वकाल में भाषित ब्रह्मा के वचन का स्मरण करो, हेवीर ! विह्वल मत होना, पांच हजार वर्ष तक जल में मधु कैटभ के साथ बाहुयुद्ध करने वाले विष्णु के पुत्र हो ! ॥ ३२ ॥ हीनशस्त्र वाला

९३८६

ततः पपात दैत्येन्द्रः कम्पयन्निव मेदिनीम् ।
उद्वमन् रुधिरोद्गारं मुखेन नयनेन च ॥ ३५ ॥
सुप्रभावासिनः सर्वे निहते शत्रुतापने ।
पातालं विविशू रम्यं प्रद्युम्नभयपीडिताः ॥३६॥
विचित्रपुष्पं प्रचुरं नभस्थला-
त्पपात कन्दर्पशिरस्यलं तदा ।
समं समन्तात् सुरसिद्धचारणैः
समाहता दुन्दुभयः प्रसस्वनुः ३७

इति श्रीवाग्वतीप्रशंसायां प्रद्युम्नविजये महेन्द्रदमनवधो नाम त्रयोदशोऽध्यायः

तुम्हारे शत्रु को जितने के लिए शस्त्र की अपेक्षा नहीं है। उस के मत्थे में वेग से मुक्का मारो ॥ ३३ ॥ नारद के उस वचन को सुन कर वेग से कूद कर प्रद्युम्न ने सहसा मुट्ठी बाँध कर शिर में मारा ॥ ३४ ॥ उस के वाद मुख से तथा आखों से रक्तधारा का वमन करता हुआ और भूमि को मानों कम्पित करता हुआ दैत्येन्द्र गिर पडा ॥३५॥ शत्रुतापी दैत्यराज महेन्द्रदमन के मरते ही सुप्रभा निवासी समस्त दैत्य लोग प्रद्युम्न के भय से पीडित हो कर रम्य पाताल में घुसे ॥ ३६ ॥ उस समय आकाश मण्डल से प्रद्युम्न के मस्तक पर विचित्र एवं प्रचुरमात्रा में पुष्पवृष्टि हुई और चारों ओर से एक साथ सुर सिद्ध गन्धर्व चारण आदियों से ताडित दुन्दुभि वजने लगे ॥३७॥ त्रयोदश अध्याय समाप्त।

पुलस्त्य उवाच—

ततस्तस्मिन् क्षणे पुण्ये वाग्वती कामरूपिणी ।
अब्रवीदीदृशं वाक्यं कृताञ्जलिपुटा सती ॥१॥
विष्णुः कृष्णो हृषीकेशश्चक्रपाणिश्चतुर्भुजः ।
उपेन्द्रः शार्ङ्गधन्वा च भद्रकीर्तिरधोक्षजः ॥२॥
केशवो रुक्मिणीनाथो माधवो मधुसूदनः ।
सत्यभामापतिश्चैव द्वारकापुरसुप्रियः ॥ ३ ॥
मित्रवृन्दाधिपश्चैव जाम्बवत्यधिपस्तथा ।
कंसासुररिपुश्चैव रोहिणीपतिरेव च ॥ ४ ॥
नमोऽस्तु लक्ष्मीपतये धरणीपतये नमः ।
महामत्स्यवपुर्धृत्वा श्रुतिर्नाथ त्वयोद्धृता ॥ ५ ॥

पुलस्त्य बोले— इस के अनन्तर उस पुण्यमय समय में इच्छानुकूल रूप धारण करने वाली वाग्वती हस्ताञ्जलि संपुट कर इस प्रकार का वाक्य बोली ॥ १ ॥ विष्णु कृष्ण हृषीकेश चक्रपाणि चतुर्भुज उपेन्द्र शार्ङ्गधन्वा भद्रकीर्ति अधोक्षज केशव रुक्मिणीनाथ माधव मधुसूदन सत्यभामापति द्वारकाप्रिय मित्रवृन्दाधिपति जाम्बवतीपति कंसासुररिपु रोहिणीपति लक्ष्मीपति एवं धरणीपति तुम को नमस्कार है ॥ १-२-३-४ ॥ हेनाथ ! महामत्स्य का रूप धर कर तुमने श्रुति का उद्धार किया घोर

घोरकूर्मवपुर्धृत्वा मन्दरो विधृतस्त्वया ।
वराहरूपमास्थाय त्वयैवधरणी धृता ॥ ६ ॥
नारसिंहं वपुर्धृत्वा प्रह्लादः पालितस्त्वया ।
वामनं वपुरास्थाय महेन्द्रो रक्षितस्त्वया ॥७॥
कार्तवीर्योऽपि निहतस्त्वया भार्गवछद्मना ।
निहन्ता रावणस्यापि त्वमेव रघुपुङ्गवः ॥८॥
त्राता त्राणार्थिनां चैव दाता चापि सुखस्य च ।
स्थितिकर्ताऽसि लोकानां त्वमेव परिकीर्तितः ६
समर्थश्च हृषीकेशः सेतुबन्धविदारणे ।
गङ्गां द्रष्टुं ममेच्छास्ति त्वत्प्रसादाज्जनार्दन १०

कूर्म का शरीर धर कर तुम ने मन्दराचल का धारण किया, वराह का रूप धर कर तुमने ही धरणी का धारण किया, नरसिंह रूप धर कर प्रह्लाद का तुमने ही पालन किया, वामन रूप धर कर तुमने महेन्द्र की रक्षा की, भार्गव के छल से तुमने सहस्रबाहु को वध किया, रघुवंश में उत्पन्न होकर रावण को मारने वाले भी तुम ही हो, शरणागत का परित्राण करने वाले और सुख के दाता एवं लोकों की मर्यादा बाँधने वाले भी सर्वत्र तुम ही कहे गये हो, इस लिए समस्त इन्द्रियों के नियन्ता और इस महेन्द्रदमन के बाँधे हुए चन्द्रगिरि की

वाग्वत्या वचनं श्रुत्वा हर्षोत्फुल्लविलोचनः ।
सेतुं विदारयामास निरुद्धं भगवान् हरिः ११
सेतुबन्धे प्रभिन्नेतु विष्णुना प्रभविष्णुना ।
ददर्श सहसा घोरं विराधं कच्छपासुरम् ॥१२॥
नारदो भगवान् शीघ्रं प्रद्युम्नमिदमब्रवीत् ।
कृतोत्थानं दुरात्मानं विराधं दानवाधमम् १३
हत्वा कुक्षिगतं रत्नं शीघ्रमाहर्तुमर्हसि ।
महर्षेर्वचनं श्रुत्वा खड्गाग्रप्रहतान्तरात् ॥ १४ ॥
आददे स महारत्नं प्रद्युम्नो लघुविक्रमः ।
परिवृत्य पुनः शीघ्रं संक्रुद्धः कच्छपासुरः १५

माला के सेतुबन्ध को तोडने में समर्थ हो, हेजनार्दन ' तुम्हारी कृपा से मुझे गङ्गा का दर्शन करने की इच्छा है ॥ ५–६–७ ८–९–१० ॥ इस प्रकार वाग्वती का वचन सुन कर हर्ष से प्रफुल्ल नेत्र वाले भगवान् हरि ने वाग्वती को रोकने वाला सेतु (बाँध) फोंड दिया ॥ ११ ॥ सर्वशक्तिमान् विष्णु के द्वारा सेतुबन्ध के भेदन कर देने पर सहसा घोर कच्छपरूपी विरोध को देख कर भगवान् नारद शीघ्र प्रद्युम्न से यह कहने लगे ॥ १२ ॥ दानवाधम दुरात्मा विरोध को उठा कर मार कर उस की कुक्षि का रत्न (दंष्ट्रारत्न) शीघ्र लेलेना चाहिए ॥ १३ ॥

प्रद्युम्नं त्रासयामास नर्दमानः पुनः पुनः: ।
अत्यक्तजीवितं दृष्ट्वा संक्रुद्धं कच्छपासुरम् १६
अब्रवीदीदृशं वाक्यं नारदो मुनिसत्तमः ।
दैत्यानां दानवानां च प्रसादाच्छूलपाणिनः १७
वाग्वतीजलसंश्लेषाद्वधस्तेषां न विद्यते ।
तस्माद्विक्षिप्य पक्षेण जलात्पन्नगविद्विषा १८
पातनीयं शिरश्छित्वा चक्रेण मकरध्वज ।
महर्षेर्वचनं श्रुत्वा तरुणादित्यवर्चसा ॥ १९ ॥

महर्षि के वचन सुन कर फुर्तिले पराक्रमी प्रद्युम्न ने खड्ग से छाती चीर कर उस महारत्न को निकाल लिया ॥ १४ ॥ पुनः तुरन्त पलट कर क्रूद्ध कच्छपासुर वारं वार गर्जना करके प्रद्युम्न को त्रास देने लगा ॥ १५ ॥ न मर कर प्रत्युत क्रोधित हुए कच्छपासुर को देख कर मुनिसत्तम नारद इस प्रकार का वाक्य बोले ॥ १६ ॥ त्रिशूलपाणि महादेव के प्रसाद से दैत्य दानवों का जब तक वाग्वती के जल का सम्बन्ध रहेगा, तब तक इन का मृत्यु नहीं होता है ॥ १७ ॥ इस लिए हे मकरध्वज! गरुड के पक्ष से जल से निकाल कर बाहर पटक कर चक्र से शिर काट कर गिरा दो ॥ १८ ॥ महर्षि का बचन सुन कर बालभास्करकान्तिवाले पिता के चक्र से प्रद्युम्न ने कच्छपासुर का शिर काट दिया ॥ १९ ॥ महात्मा प्रद्युम्न के

शिरश्छिच्छेद कूर्मस्य पितुश्चक्रेण केशविः ।
विराधं निहतं दृष्ट्वा प्रद्युम्नेन महात्मना ॥२०॥
ववर्षुः कुसुमं देवा विस्मयाकुलमानसाः ।
ततश्चन्द्रावतीं गृह्य वाग्वती सरिदुत्तमा ॥२१॥
विस्मयोत्फुल्लनयनं प्रद्युम्नमिदमब्रवीत् ।
विश्वासार्थं त्वया वीर मद्धस्ते प्रतिपादिताम् २२
इमां चन्द्रावतीं देवीं गृहाण मकरध्वज ।
इत्युक्त्वा वाग्वती देवी गता सञ्जातविस्मया २३
बभूव सन्ध्यासमयः कुङ्कुमारुणवारिदः ।
तमसा पूरिते व्योम्नि ज्योत्स्नानिकरसंवृतः २४

द्वारा विराध को मरा हुआ देख कर आश्चर्य से चकितचित्त वाले देवताओं ने पुष्पवृष्टि की ॥ २० ॥ तदनन्तर उत्तम नदी वाग्वती चन्द्रावती को लेकर विस्मय प्रफुल्ल नेत्र वाले प्रद्युम्न से यह कहने लगी ॥ २१ ॥ हेवीर कामदेव ! विश्वासपूर्वक तुमने मेरे हाथ में सौंपि हुई इस चन्द्रावती देवी का ग्रहण करो, इतना कह कर आश्चर्यवाली वाग्वती देवी चली गई ॥ २२-२३ ॥ सन्ध्या का समय हुआ, सन्ध्यामेघ कुंकुम के समान अरुणवर्ण हुए, अन्धकार से पूरित गगन मण्डल में मानों चन्द्रावती के विवाहोत्सव को देखने के लिए ज्योत्स्ना से

Missing Page :- 107-136

अङ्गप्रदीपं यः कुर्यान्मम भक्त्या सुसंयतः ॥२७॥
स्वयंप्रभवेषु देशेषु समुत्पत्तिः प्रवर्तते ।
अङ्गप्रदक्षिणं यस्तु करोति मम भक्तिमान् २८
रूपवान् भवतेऽत्यन्तं वज्रसंहननोऽपि वा ।
अन्नपूजां तु यो दद्यान्मम भक्त्याऽतियत्नतः २९
आयुष्मान् बलवान् भूयाज्जायते च महीपतिः ।
दीपमालां तु यो दद्याद् भवते मम भक्तितः ३०
चक्षुष्मान् भवतेऽत्यन्तं तेजस्वी वापि चैव ह ।
गुग्गुलुं दहते यस्तु सततं मम भक्तिमान् ॥३१॥
तस्य पार्श्वे विशेषेण वरं तस्मिन्न संशयः ।

मेरा अङ्गप्रदीप करता है, उस की उत्पत्ति स्वयप्रभ देशों में होती है ॥ २७ ॥ जो भक्तिमान् मेरी अङ्गप्रक्षिणा करता है, वह अत्यन्त सुन्दर एवं वज्रशरीर होता है ॥ २८ ॥ मेरी भक्ति से यत्न पूर्वक जो अन्न पूजा देगा, वह आयुष्मान् बलवान् होकर राजा होता है ॥ २९ ॥ जो मेरी मन्दिर में भक्तिपूर्वक दीपमाला देगा, वह अत्यन्त अत्यन्त सुन्दर एवं तेज दृष्टिवाला होकर तेजस्वी होता है ॥ ३० ॥ जो भक्त मेरे मन्दिर में सर्वदा गुग्गुल का धूप जलाता है, उस के पास में विशेषतया सदा शुभ ही होता है इसमें संशय नही है ॥ ३१ ॥ तिलपात्र के दान से पाप से अवश्य मुक्त

तिलपात्रप्रदानेन त्रायते किल्विषादलम् ॥३२॥
तथैव च सुवर्णेन तथैव तिलधेनुना ।
हेमश्रृङ्गां रौप्यखुरां चैलघण्टावलम्बिनीम् ३३
सवत्सां कपिलां दद्याद्भूयो यज्ञफलं लभेत् ।
रत्नकञ्चुकदानेन स भवेद्बहुरत्नवान् ॥ ३४ ॥
वस्त्रवान् वस्त्रदानेन भूमिदानेन भूमिमान् ।
गीतनृत्यप्रदानेन तूर्यनादादिनाऽपि वा ॥३५॥
मम पार्श्वचरो भूत्वा जायते दुःखवर्जितः ।
नीलोत्पलार्किपद्मेन प्रदत्तेन श्रियं लभेत् ॥३६॥
वुकेन बिल्वपत्रेण वरदोऽस्मि विशेषतः
मोक्षं धुत्तूरकेणाऽपि करवीराद् धनप्रदः ॥३७॥

होता है, इसी प्रकार सुवर्ण दान से, एवं तिल धेनु के दान से निष्पाप होता है ॥ ३२ ॥ स्वर्णश्रृङ्गी रजतखुरा वस्त्र घण्टा आदि से भूषित सवत्सा कपिला गौ का दान करने से महायज्ञका फल प्राप्त करता है ॥ ३३ ॥ रत्नकञ्चुक दान से बहु रत्नवान् होता है, वस्त्रदान से वस्त्रवान होता है, भूमिदान से भूपति होता है ॥३४॥ गात नृत्य प्रदान से तथा वाद्यनादादि के प्रदान करने से मेरा सहचारी गण होकर दुःख वर्जित होता है, नीलकमल सूर्यकमल आदि प्रदान से लक्ष्मी प्राप्ति होती हैं ॥ ३५-३६ ॥ विशेष कर

जात्यादिना सुगन्धेन पुष्पेण सुभगो भवेत् ।
पुष्पैः पत्रैः फलैस्तोयैर्यो मामर्चति सन्ततम् ३८
सोऽपि स्वर्गफलं भुक्त्वा मोदते नाऽत्र संशयः ।
मम मूले समुद्भूतं प्रावृट्समयनिःसृतम् ॥३९॥
तीर्थं मृगोदकं नाम तत्रैव च प्रदृश्यते ।
मृगोदकोद्भवे तीर्थे वाग्वत्याः पश्चिमे तटे ॥४०॥
जन्मान्तरकृतैः पापैः स्नानमात्रेण मुच्यते ।
अत्र बर्बरिका नाम (तीर्थं) वाग्वत्याः पूर्वके तटे
तत्राऽपि च कृतस्नानात्पार्वती परितुष्यति ।
अत्र कोषोदकं नाम तीर्थं कामफलप्रदम् ॥४२॥

कुकपुष्प विल्वपत्र आदि चढाने से वर देता हूं, धतूर के पत्र पुष्प फलों को चढाने से मोक्ष देता हूं, करवीरपुष्पों (कनेर) को चढाने से धन देता हूँ ॥ ३७॥ जातिपुष्प आदि सुगन्ध पुष्पों को चढाने से सुन्दर एवं सौभाग्यशाली होता है, वह भी स्वर्गफल भोग कर आनन्द प्राप्त करता है. इस में संशय नहीं है ॥ ३८॥ मेरे मूल में वर्षाकाल में प्रकट होने वाला मृगोदक तीर्थ (जलका झरना) वहीं पर दिखाई देता है, मृगोदक तीर्थ में वाग्वती के पश्चिम टतपर स्नानमात्र करने से जन्मान्तरकृत पापों से मुक्त हो जाता है ॥ ३९-४० ॥ यहीं पर बर्बरिका नामक तीर्थ वाग्वती के पूर्व तट पर है, वहाँ पर भी स्नान करने से पार्वती सन्तुष्ट होती है,

कोषं कोषं समाहृत्य सुरैः सर्वैः प्रकल्पितम् ।
तीर्थे कोषोदके चाऽपि तदग्रे च नदीजले ॥४३॥
तत्राऽभिषेकं यः कुर्यात्सर्वमेधफलं लभेत् ।
त्रिसन्ध्यं तु समासाद्य सन्ध्यां यः समुपासते ४४
किल्बिषात्स कृती त्यक्तः स द्विजः परिमुच्यते ।
भृगुप्रपतनं नाम कन्दरं चाऽपि विद्यते ॥४५॥
तस्मात्प्रपतनाद् वाऽपि स्वर्गलोके महीयते ।
भृगुकन्दरमूले तु ब्रह्मभेदे मनोरमे ॥ ४६ ॥
स्नायते विधिना यस्तु ब्रह्मलोकं स गच्छति ।
अत्र गोरक्षकं (इक्षु) नाम तीर्थं कामफलप्रदम्

यहीं पर कोषोदक नाम का तीर्थ कामानुकूल फल देता है ॥४१-४२॥ समस्त तीर्थों के कोषों को जम्मा कर सर्व देवों ने कोषोदक तीर्थ कल्पना की है। कोषोदक तीर्थ में उसी के अग्रभाग में नदी के जल में अभिषेक (स्नान) करने वाला सर्वयज्ञों का फल प्राप्त करता है ॥ ४३-४४ ॥ इस पुण्य तीर्थ में प्रातः मध्याह्न सायं त्रिसन्ध्य में आकर जो स्नान कर सन्ध्योपासन करता है, वह पुण्यात्मा द्विजन्मा पाप से मुक्त होकर मोक्ष प्राप्त करता है ॥ ४५ ॥ इसी के पास में भृगु पतन नाम की कन्दरा भी है, वहाँ से गिर कर मरने से भी स्वर्ग लोक में पूजित होता है ॥ ४६ ॥ भृगु कन्दर तीर्थ के मूल मनोहर ब्रह्म भेद तीर्थ में जो विधि पूर्वक स्नान करता है

तत्राऽभिषेकं यः कुर्याद् गोसहस्रफलं लभेत् ।
गौरीशिखरमूले तु वाग्वत्यां स्नायते तु यः ४८
स्त्रीषु सौभाग्यमाप्नोति देव्या लोकं स गच्छति ।
स्नानकुण्डं समासाद्य स्नायते यस्तु मानवः॥४९॥
स्कन्दलोकमवाप्नोति भूत्वा वैश्वानरद्युतिः ।
अत्र पञ्चनदं (दी) नाम तीर्थं ब्रह्मर्षिसेवितम् ५०
पञ्चयज्ञफलं तत्र स्नानमात्रेण लभ्यते ।
शूलोद्गङ्गे शुभे तीर्थे स्नायते यस्तु मानवः ५१
जातिस्मरत्वमाप्नोति तीर्थिको नियमान्वितः ।

वह ब्रह्म लोक में जाता है, यहाँ गोरक्षतीर्थ कामना के अनुकूल फल दायक है, वहाँ पर जो (अभिषेक) स्नान करता है, वह सहस्र गोदान का फल प्राप्त करता है ॥४७॥ गौरी शिखर के मूल में वाग्वती में जो स्नान करता है, स्त्रियों में सौभाग्य प्राप्त कर देवी लोक में जाता है ॥ ४८ ॥ स्नान कुण्ड में जाकर जो मनुष्य स्नान करता है, वह अग्नि तुल्य कान्ति वाला होकर स्कन्द लोक में जाता है ॥ ४९ ॥ यहाँ पर' पञ्चनदी तीर्थ ब्रह्मर्षियों से सेवित है, वहाँ स्नान मात्र करने से पञ्चनदी यज्ञों का फल प्राप्त होता है ॥ ५० ॥ शूलोद्गङ्गा नामक शुभ तीर्थ में जो मानव स्नान मात्र करता है वह नियमी तीर्थ यात्री जातिस्मर (जन्मान्तर की बातों को स्मरण करने वाला) होता है ॥ ५१ ॥ गुह्यकों (यक्षों) से

प्राप्याम्रातकपानीयं गुह्यं गुह्यकरक्षितम् ॥५२॥
स्नायते विधिना यस्तु यक्षलोकं स गच्छति ।
अत्र ब्रह्मोदकं प्राप्य तीर्थं कन्दरनिःसृतम् ५३
स्नायते विधिना यस्तु न मृत्युस्तं प्रपश्यति ।
योगकुण्डे देववाप्यां कुमारकन्दरेऽपि च ॥५४॥
ब्रह्मदीपे विशेषेण स्नातव्यं स्वर्गकांक्षिभिः ।
यस्तु सम्पूजयेद् भक्त्या पशुयोनिं मम प्रियाम् ५५
मुच्यते पशुपाशेभ्यः कामसिद्धिश्च लभ्यते ।
यो दद्यान्मम क्षेत्रेऽस्मिन् ब्राह्मणेभ्यश्च भोजनम् ५६
तस्य यज्ञफलं भूयात्स्वर्गलोकमवाप्नुयात् ।

इति श्री पशुपतिपुराणे हरिणेश्वरवाक्यं नाम अष्टादसोऽध्यायः ॥

सुरक्षित गुह्य आम्रातकपानीय नामक तीर्थ में जाकर जो विधि से स्नान करता है, वह यक्ष लोक में जाता है ॥ ५२ ॥ यहाँ कान्दर से निकले हुए ब्रह्मोदक तीर्थ में आकर जो विधि से स्नान करता है, उसको मृत्यु नहीं देखता ॥ ५३ ॥ योगकुण्ड में देववापी में कुमार कन्दरा में ब्रह्मदीप में स्वर्गकांक्षी लोगों को विशेष कर स्नान करना चाहिए ॥ ५४ ॥ जो भक्ति से मेरी प्यारी पशुयोनि की पूजा करता है, वह पशुपाशों से मुक्त हो जाता है और कामना सिद्धि भी मिलती है ॥ ५५ ॥ मेरे इस क्षेत्र में जो ब्राह्मणों को

सनत्कुमार उवाच—

तस्य तद्वचनं श्रुत्वा ब्रह्मलोकपितामहः ।
अब्रवीदीदृशं वाक्यं नमस्कृत्य पुनः पुनः ॥१॥
दुःखार्णवे निमग्नानां प्राणिनां मोक्षकारणात् ।
शास्मि हे त्वं महादेव पुराणममृतोपमम् ॥२॥
त्वन्मुखोक्तमिदं सारं पुराणं परमेश्वर ।
स्नायते(श्रृणोति)विधिना यस्तु स्वर्गस्तस्य न दूरतः
इदं पुनर्महापुण्यं पुराणं लोकदुर्लभम् ।
श्रृणोति सततं यस्तु स्वर्गस्तस्य न दुर्लभः ॥४॥

भोजन देता है, उस को यज्ञ फल मिलता है और स्वर्गलोक को प्राप्त करता है ॥ ५६ ॥

अष्टादश अध्याय समाप्त ।

सनत्कुमार बोले— हरिणेश्वर के इन वचनों को सुन ब्रह्मलोक पितामह बारम्बार नमस्कार कर इस प्रकार का वाक्य बोले ॥ १ ॥ दुःख समुद्र में डूबे हुए प्राणियों के मोक्ष के निमित्त हे महादेव ! अमृततुल्य पुराण (पशुपति पुराण) आप से हमने सुना हे परमेश्वर ! आप के मुखारविन्द से कथित यह पुराण सारभूत है जो विधि से इस को पढता है, उस के लिए स्वर्ग दूर नहीं है ॥२-३॥ पुनः लोक में दुर्लभ महापुण्य इस पुराण (पशुपति पुराण) को जो निरन्तर सुनता है, उसके लिए स्वग दुर्लभ नहीं

मत्करस्थेन शृङ्गेण विष्णोर्हस्ते स्थितेन च ।
पुरन्दरकरस्थेन किं कर्तव्यं महेश्वर ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा ब्रह्मणः परमेष्ठिनः ।
अब्रवीदीदृशं वाक्यं भगवान् हरिणेश्वरः ॥६॥

श्रीमहादेव उवाच—

त्वत्करस्थमिदं शृङ्गं हारिणं मम मध्यमम् ।
अत्रैव स्थाप्यतां ब्रह्मन् निर्मले निम्नगातटे ॥७॥
गोकर्णेश्वर इत्येवं पृथिव्यां ख्यातिमेष्यति ।
दशग्रीवादयो वीराः साधयिष्यन्ति तत्र माम् ८
त्वत्करस्थमिदं विष्णो शृङ्गमूलं सुशोभनम् ।
नीत्वा रसातले रम्ये स्थापनीयं प्रयत्नतः ॥ ९ ॥

है ॥ ४ ॥ हे महेश्वर ! मेरे कर में स्थित शृङ्ग से, विष्णु के हाथ में स्थित शृङ्ग से तथा इन्द्र के हस्त में स्थित शृङ्ग (खण्ड) से क्या करना चाहिए ? ॥ ५ ॥ परमेष्ठी ब्रह्मा के उस वचन को सुनकर भगवान् हरिणेश्वर इस प्रकार का वाक्य बोले ॥ ६ ॥ महादेव बोले— हे ब्रह्मन् ! तुह्मारे हाथ में स्थित हरिणरूपधारी मेरे शृङ्ग का यह मध्यम खण्ड वहीं पर निर्मल नदी के तीर पर स्थापित करो ॥ ७ ॥ गोकर्णेश्वर नाम से पृथ्वी में प्रख्यात होगा, रावण बाणासुर आदि वीर आकर यहाँ पर मेरी आराधना करेंगे ॥ ८ ॥

तच्च सम्पूज्यते भक्त्या नागदानवराक्षसैः ।
शृङ्गेश्वर इति प्रोक्तं पातालतलवासिभिः ॥१०॥
शृङ्गाग्रं हारिणं पुण्यं मामकं त्रिदशेश्वर ।
नीत्वा सुरालये रम्ये स्थापनीयं ममाऽऽज्ञया ११
यदा हरति रक्षेन्द्रस्त्वत्पुराद्बलदर्पितः ।
स च दक्षिणगोकर्णो भविष्यति पुरन्दर ॥१२॥
इत्युक्त्वा भगवान् शम्भुः सुरासुरनमस्कृतः ।
द्योतयन् प्रभयाऽऽकाशं हिमवन्तं विनिर्ययौ १३

इति श्री पशुपतिपुराणे शृङ्गेश्वर प्रतिष्ठापनो नाम अष्टादसोऽध्यायः ॥

हे विष्णो ! यह तुह्मारे हाथ का सुन्दर शृङ्गमूल रमणीय रसातल में लेकर प्रयत्न से स्थापित करो ॥ ९ ॥ इसकी पूजा नाग, दानव, राक्षस आदि पातालतल के निवासी शृङ्गेश्वर के नाम से करेंगे ॥ १० ॥ हे महेन्द्र ! तुह्मारे हाथ का मेरा पवित्र एवं रमणीय हारिण यह शृङ्गाग्र मेरी आज्ञा से लेकर रम्य सुरपुर अमरावती में स्थापित करो ॥ ११ ॥ हे पुरन्दर ! जब राक्षसेन्द्र लङ्काधिराज रावण बल से दर्पित होकर तुह्मारी राजधानी से हरण करेगा तो वह दक्षिण गोकर्ण के नाम से प्रसिद्ध होगा ॥ १२ ॥ सुरासुरवन्दनीय भगवान् हरिणेश्वर शम्भु प्रभा से आकाश को प्रकाशित करते हुए हिमवान् शैलराज में निकल गये ॥ १३ ॥

इति अष्टादस अध्यायः ॥

सनत्कुमार उवाच —

वाक्यं भगवतः श्रुत्वा ब्रह्मविष्णुपुरन्दराः ।
विस्मयं परमं जग्मुः किञ्चिन्मोहवशं गताः ॥१॥
ततो गृहीत्वा शृङ्गाग्रं हारिणं लोकपूजितम् ।
अमरावतीं पुरीं रम्यां निर्ययौ त्रिदशेश्वरः ॥२॥
शृङ्गमूलं तु तन्नीत्वा पाताले रत्नदीपिते ।
स्थापयामास सहसा भगवान् मधुसूदनः ॥३॥
मध्यमं हारिणं शृङ्गं चन्द्रभागासरित्तटे ।
स्थापयामास तत्रैव भगवान् कमलोद्भवः ॥४॥
ब्रह्मणा स्थापितं श्रुत्वा गोकर्णं भुवनेश्वरम् ।
सम्प्राप्ता मुनयः स्वर्गात्तीर्थयात्राटनार्थिनः ॥५॥

सनत्कुमार बोले- भगवान् का वाक्य सुनकर ब्रह्मा, विष्णु इन्द्र परम आश्चर्य से चकित होकर कुछ मोहवश होगये ॥ १ ॥ उस के अनन्तर लोकपूजित हारिण शृङ्ग के अग्रभाग को लेकर त्रिदशेश्वर इन्द्र रमणीय अमरावती की ओर निकल गये ॥ २ ॥ एवं उस शृङ्गमूल को लेकर रत्नों से प्रदीप्त पाताल में जाकर भगवान् मधुसूदन ने सहसा स्थापित किया ॥ ३ ॥ हरिणेश्वर के मध्यम शृंगखण्ड को लेकर भगवान् ब्रह्मा ने वहीं पर चन्द्रभागा नदी के तट पर स्थापित किया ॥ ४ ॥ ब्रम्हा के द्वारा भुवनेश्वर

यावन्ति भुवि तीर्थानि गङ्गादीनि वनोत्तमे ।
प्रभावाद्देवदेवस्य सम्भूतानि शुभानि च ॥६॥
अशेषाणि परिभ्राम्य मुनयः शंसितव्रताः ।
ब्रह्माणं प्रणिपत्योचुर्गोकर्णं परिपूज्य च ॥ ७ ॥
भगवं स्त्वां विना स्वर्गे स्थातुं नेच्छामहे वयम् ।
तस्मात्स्वर्गमलङ्कर्तुं प्रसादं कुरु पद्मज ॥ ८ ॥
तेषां श्रुत्वा महर्षीणां वाक्यं विगतकल्मषः ।
प्रक्रीडितमृगाकीर्णे प्रकीर्णगजगण्डके ॥ ९ ॥
कोकिलालापललिते चलच्चूतादिपल्लवे ।
श्लेष्मान्तकवने पुण्ये पुष्पिते पादपे सदा ॥१०॥

गोकर्ण को स्थापित हुआ सुन कर तीर्थयात्राटनार्थी मुनि लोग स्वर्ग से आये ॥ ५ ॥ भूमण्डल में गङ्गादि जितने शुभ तीर्थ हैं, वें सब महादेव के प्रभाव से वनोत्तम श्लेष्मान्तक मृगस्थली में प्रकट होगये ॥ ६ ॥ प्रशस्त व्रत वाले मुनि लोग इन अशेष तीर्थों में परिभ्रमण कर गोकर्णेश्वर की पूजा कर प्रणाम कर ब्रह्माजी से बोले ॥ ७ ॥ भगवान्! आप के विना हम लोग स्वर्ग में निवास करना नहीं चाहते हैं, इस लिए हेपद्मज! स्वर्ग को अलङ्कृत करने की कृपा की जिये ॥ ८ ॥ उन महर्षियों के वचन सुन कर निष्कल्मष ब्रह्मा, क्रीडा करते हुए मृगों से आकीर्ण,

निवासाय समादिश्य पौत्रं विश्रवसं मुनिम् ।
ब्रह्मा मुनिगणैः सार्धं स्वाराज्यसदनं ययौ ॥११॥

इति श्रीपशुपतिपुराणे गोकर्णस्थापनो नाम एकोनविंसोऽध्यायः ॥

सनत्कुमार उवाच—

एतस्मिन्नन्तरे काले सुमाली राक्षसाधिपः ।
अप्रेषयद् दुहितरं पार्श्वं विश्रवसो मुनेः ॥ १ ॥
गता सा नैकसी देवी पितुर्वचनकारिणी ।
गोकर्णारण्यकं रम्यं यत्र विश्रवसो मुनिः ॥२॥
कन्यां रूपवतीं दृष्ट्वा तन्वङ्गीं सुपयोधराम् ।
धर्मेण वरयामास विश्रवा मुनिपुङ्गवः ॥ ३ ॥

गज गण्डक आदि महामृगों से प्रकीर्ण, कोकिलों के पञ्चम आलापों से ललित, आम्रादि पल्लवों की चञ्चलता से चारु, सदा पुष्पित पादपों से शोभित, ऐसे पुण्यमय श्लेष्मान्तक वन में पौत्र विश्रवा मुनि को निवासार्थ आदेश देकर, मुनिगणों के साथ ब्रह्मा स्वर्ग राज भवन को चले गये ॥ ६-१०-११ ॥ इति एकोनविंसो अध्यायः ॥

सनत्कुमार बोले— इसी अन्तरिम काल में राक्षसाधिराज सुमाली ने अपनी लडकी को विश्रवा मुनि के पास भेजा ॥ १ ॥ पिता के आज्ञा पालन कर वह नैकसीदेवी रम्य गोकर्णारण्यक में गई, जहाँ कि विश्रवा मुनि रहते थे ॥ २ ॥ तन्वङ्गी सुपयोधरा रूपवती कन्या को देखकर मुनिपुङ्गव विश्रवा ने धर्म से विवाह

रराम स तया सार्धं काममोहवशङ्गतः ।
तुतोष नैकसी चापि लब्ध्वा विश्रवसं पतिम् ४
तस्या देव्या विशालाक्ष्या गर्भादेव भयङ्करः ।
सुषुवे विश्रवः पुत्रो दशग्रीवो महाबलः ॥५॥
तस्य सञ्जातमात्रेण कम्पते धरणी भृशम् ।
मांसाभिलाषिणो दृष्ट्वा पतन्ति दिवि पक्षिणः ६
ववर्ष रुधिरं चैव मेघो घोरस्वरोऽभवत् ।
निष्प्रभश्च तदादित्यश्चन्द्रश्चैव व्यजायत ॥७॥
पुत्रं दशशिरोपेतं नीलाम्बुजचयप्रभम् ।
सम्प्राप्य विश्रवास्तत्र तुतोषाऽतिशयं तदा ॥८॥

किया ॥ ३ ॥ वे उस के साथ काम के मोहवश रमण करने लगे, नैकसी भी विश्रवा मुनि को पति प्राप्त कर सन्तुष्ट हुई ॥४॥ विशालाक्षी उस नैकसीदेवी के गर्भ से ही भयङ्कर महाबली दशानन विश्रवा का पुत्र उत्पन्न हुआ ॥ ५ ॥ उस जन्म लेते ही भीषण भूकम्प होने लगा, देखकर मांसभक्षी पक्षी आकाश में उडने लगे ॥ ६ ॥ घोर गर्जना करता हुआ मेघ रक्तवृष्टि करने लगा, सूर्य तथा चन्द्र हतप्रभ मलिन हो गये ॥ ७ ॥ दश शिरों से युक्त नील-कमलपटलतुल्यकान्ति वाले पुत्र को प्राप्त कर उस समय विश्रवा सन्तुष्ट हुए ॥ ८ ॥ दो भाईयों के साथ (कुम्भकर्ण विभीषण)

कालेन वर्धयामास भ्रातृभ्यां सह तद्वपुः ।
वीर्येण वयसा चाऽपि संश्रितः स बभूव ह ॥९॥
एकदा तु दिने प्राप्ते धनेशं पुष्पकस्थितम ।
दृष्ट्वा दशशिराः श्रीमान् मातरं वाक्यमब्रवीत् १०

दशग्रीव उवाच —

विमानं पुष्पकं पुण्यं केनोपायेन विद्यते ।
स च कस्य सुतो मातः श्रोतुमिच्छामि तद्वद ११
पुत्रस्य वचनं श्रुत्वा नैकसी चारुहासिनी ।
अब्रवीदीदृशं वाक्यं विस्मयोद्धतमानसा ॥१२॥

नैकस्युवाच —

तवाऽग्रजोऽयं हेपुत्र धनेशो लोकसम्मतः ।
अर्जितं तपसा तेन विमानं पुष्पकं स्थितम् १३

रावण को चिरकाल तक पालकर पुष्ट किया, रावण भी आयु बल वीर्यशाली हुआ ॥ ९ ॥ एक दिन आकाश में पुष्पक विमान पर विराजमान कुवेर को देखकर श्रीमान् दशानन ने माता नैकसी से पूछा ॥ १० ॥ रावण बोला— हे माता ! यह पुण्य पुष्पक विमान किस उपाय से है और वह पुष्पक पर बैठा हुआ किस का पुत्र है ? मैं सुनना चाहता हूँ कहो ॥११॥ पुत्र के वचन सुनकर चारुहासिनी विस्मय से उद्धत मनवाली नैकसी इस प्रकार का वाक्य बोली ॥१२॥ नैकसी बोली—हे पुत्र ! यह तुह्मारा वडा भाई धना-

त्रैलोक्यमपि वश्यः स्याद्यदिपुत्र त्वमिच्छसि ।
आराध्यतां पितुर्वाक्यं गोकर्णे भुवनेश्वरम् १४
ततः सम्पूजयामास गोकर्णं राज्यलिप्सया ।
छित्वा छित्वाऽऽत्मनः शीर्षं पूर्णाहुतिमकल्पयत् १५
वर्षाणां हि सहस्राणि दश पूर्णे दशाननम् ।
वरं प्रादात्समागत्य ब्रह्मा सुरगणैर्वृतः ॥ १६ ॥
पौत्रं लब्धवरं श्रुत्वा सुमाली सह राक्षसैः ।
माल्यवन्तं पुरस्कृत्य प्राप्तवान् वनमुत्तमम् १७
दृष्ट्वा सम्पूजयामास पौत्रं लब्धवरं तदा ।

ध्यक्ष कुबेर लोक सम्मत (लोकों के मत से देव खजाञ्ची वना हुआ) है, इस ने तपस्या करके उपार्जन किया हुआ पुष्पक विमान है ॥१३॥ हे पुत्र ! यदि तुम चाहो तो त्रैलोक्य भी वश में हो सकता है, पिता के वाक्य से गोकर्ण में भुवनेश्वर की आराधना करो ॥१४॥ उसके वाद तदनुसार रावण ने राज्य लोभ से गोकर्ण को अपने शीर काट २ कर पूर्णाहुति देने लगा ॥१५॥ इस प्रकार दश हजार वर्ष पूर्ण होने पर सुरगणों के साथ आकर ब्रम्हा ने दशानन को वर दिया ॥१६॥ दौहित्र को लब्धवर सुनकर राक्षसों के साथ सुमाली माल्यवान् को आगेकर उत्तम वन (गोकर्ण) में आया ॥१७॥ तब लब्धवर पौत्र रावण को देखकर खूब प्रशंसा की पूजा की और उत्तम राज्य प्राप्ति के समान सहसा अत्यन्त

मुमुदे सहसाऽत्यन्तं लब्धाऽऽस्पदमिवोत्तमम् १८
प्रहस्तवचनं श्रुत्वा सर्वैः सह निशाचरैः ।
लङ्काद्वारं समासाद्य धनेशमिदमब्रवीत् ॥१९॥
त्यज लङ्कापुरीं दिव्यां रत्नतोरणमालिनीम् ।
अस्माकं राजधानीं तां न त्वं तत्र निवत्स्यसि २०
इत्युक्तस्य वचः श्रुत्वा स्वानुजस्य धनेश्वरः ।
श्लेष्मान्तकवनं गत्वा पितरं वाक्यमब्रवीत् २१
निशाचरैः सहाऽऽगत्य दशग्रीवो ममाऽनुजः ।
लङ्का त्याज्या त्वयेत्युक्त्वा संस्थितो बलदर्पितः२२
किं कर्तव्यं मया नाथ युद्धायुद्धविवक्षया ।

प्रसन्न हुआ ॥१८॥ उस के अन्तर प्रहस्त के वचन सुनकर सब निशाचरों के साथ लङ्का के द्वार में जाकर धनाध्यक्ष कुवेर को यह कहा ॥१९॥ रत्नमय तोरणों की माला वाली दिव्य लङ्का पुरी को त्याग दो, यह हमारी राजधानी है, तुम यहाँ नहीं रह सकते ॥ २० ॥ अपने छोटे भाई रावण के ये वचन सुन कर कुवेरने श्लेष्मान्तक वन में जाकर पिता विश्रवा से यह वाक्य कहा ॥२१॥ मेरा भाई दशग्रीव निशाचरों के साथ मिल कर 'तुम्हें लङ्का त्याग देनी होगी' ऐसा कह कर बल जफत कब्जा कर वैठ गया ॥२२॥ हेनाथ ! अव मुझे क्या करना चाहिए ? युद्ध

ज्ञात्वा त्वं सर्वकार्याणां तदादेष्टुं ममाऽर्हसि २३
इत्युक्तस्य स्वपुत्रस्य श्रुत्वा वाक्यं सुपेशलम् ।
अब्रवीदीदृशं वाक्यं विश्रवा मुनिसत्तमः ॥२४॥

विश्रवा उवाच —

कैलासशिखरोत्सङ्गे विस्तीर्णे स्वर्गसन्निभे ।
महादेवसखो भूत्वा वस्तव्यं मम शासनात् २५
अत्र मन्दाकिनी नाम नदीनां प्रवरा नदी ।
मानसञ्च सरः पुण्यं तत्रैव प्रविराजते ॥२६॥

सनत्कुमार उवाच —

पितुर्वाक्यमिदं श्रुत्वा धनेशः सह गुह्यकैः ।
त्यक्त्वा लङ्कापुरीं रम्यां कैलासं गिरिमाव्रजत २७

इति श्रीपशुपतिपुराणे गोकर्णेश्वर प्रतिष्ठापनो नाम विंशोऽध्यायः ॥

(इति पूर्वार्ध खण्डः)

करूँ या नकरूँ ? आप जान कर विचार पूर्वक आज्ञा कीजिये ॥ २३ ॥ इस प्रकार अपने पुत्र के उचित वाक्य सुन कर मुनिसत्तम विश्रवा इस प्रकार का वाक्य बोले ॥ २४ ॥ विश्रवा बोले – स्वर्ग के समान विशाल कैलास शैल शिखर के उत्सङ्ग में मेरे शासन से महादेव के सखा होकर वास करना चाहिए ॥ २५॥ इस कैलास की अलका पुरी में नदियों में उत्तम मन्दाकिनी नाम की नदी है, यहीं पर पवित्र मानस सरोवर विराजमान

सनत्कुमार उवाच —

ततः स्वबान्धवैः सार्धं सर्वैश्चाऽपि निशाचरैः ।
निवेश्य नगरीं लङ्कां मुमुदे स दशाननः ॥१॥
राज्याभिषेकमासाद्य पितामहकरच्युतम् ।
उद्योगं कारयामास दशास्यो भ्रातृसम्मतः ॥२॥
धनदं नरकं चाऽपि जित्वा पातालमेव च ।
सुरेन्द्रं प्रार्थयामास युद्धाय स दशाननः ॥ ३ ॥
जित्वा सुरेन्द्रं समरे मेघनादस्य मायया ।
अमरावतीं पुरीं रम्यां प्रविवेश दशाननः ॥४॥

है ॥ २६ ॥ सनत्कुमार बोले— पिता का यह वाक्य सुन कर देव कोषाध्यक्ष यक्षराज कुबेर गुह्यक गणों के साथ रमणीय लङ्कापुरी को त्याग कर कैलास पर्वत में आगया ॥२७॥ (६६५ योग)

विंश अध्याय (इति पूर्वार्ध खण्ड) ।

सनत्कुमार बोले— उसके वाद अपने बान्धवों के साथ एवं समस्त निशाचरों के साथ लङ्कानगरी में प्रवेश कर वह रावण अति प्रसन्न हुआ ॥ १ ॥ पितामह के हाथ से राज्याभिषेक प्राप्त कर दशाननने भाईयों की सम्मति से युद्ध का उद्योग कराया ॥ २ ॥ कुवेर को नरक को और पाताल को भी जित कर सुरेन्द्र को भी उस दश शिरवाले रावणने युद्ध के लिए प्रार्थना की (ललकारा हाँक दिया) ॥ ३ ॥ मेघनाद की मायां से सङ्ग्राम

शृङ्गाग्रं हारिणं दृष्ट्वा पूजितं वज्रपाणिना ।
उत्पाट्य स्वकरे कृत्वा मुमुदेऽतिशयं तदा ॥५॥
शतैरप्सरसां सार्धं रत्नानि सुबहूनि च ।
गृहीत्वा स्वबलैः सार्धं प्राप्तवान् स महोदधिम् ६
दक्षिणोदधिवेलोर्मिमालावलिसुमण्डिते ।
विद्रुमद्रुमसंघाते सन्ध्यासमयसन्निभे ॥ ७ ॥
मुक्ताफलसमाकीर्णे रत्नोपलविभूषिते ।
नागदानवनारीणां क्रीडास्थाने मनोरमे ॥८॥
शृङ्गाग्रं हारिणं पुण्यं सुरेन्द्रभवनाहृतम् ।

में सुरेन्द्र को जित कर रमणीय अमरावतीपुरी में दशाननने प्रवेश किया ॥ ४ ॥ वज्रपाणि देवेन्द्र के द्वारा पूजित हरिणेश्वर के शृङ्गाग्र को देख कर उखाड कर हाथ में लेकर उस समय अतिशय प्रसन्न हुआ ॥ ५ ॥ शैकडों अप्सराओं के साथ बहुत से रत्नों को लेकर अपने सैन्य के साथ वह महोदधि के पास पहुँचा ॥ ६ ॥ दक्षिण समुद्र की बेला (तट) में समुद्र के तरङ्गों की मालाओं की पाङ्क्तियों से मण्डित, प्रवालों के द्रुमों के संघात वाले, अत एव सन्ध्या समय के समान शोभमान, मुक्ताफलों से समाकीर्ण, रत्नोपलों से विभूषित ऐसे त्रिकूटाचल के मूल में नाग दानव आदियों की नारियों के मनोहर क्रीडा स्थान में, सुरेन्द्र के भवन से हरण कर लाये हुए हरिण के शृङ्गाग्र को

त्रिकूटमूले संस्थाप्य सन्ध्यामास्ते दशाननः॥९॥
सन्ध्यावन्दननिर्बृत्तो रावणो लोकरावणः ।
न शशाक समुद्धर्तुं वज्रकल्पमिव स्थितम्॥१०॥
शृङ्गाग्रं हारिणं दृष्ट्वा वज्रकल्पमिव स्थितम् ।
तत्त्यक्त्वा स्वपुरीं लङ्कां प्रविवेश दशाननः ११
इन्द्रोऽपि भगवान् स्वर्गं ब्रह्मणा भूरितेजसा ।
अभिषिक्तः स्वयं राज्यं पालयामास लीलया१२
अथ हृष्टमना भूत्वा रावणो रुद्रभक्तिमान् ।
निर्ममे निलयं तस्य रत्नतोरणदीपितम् ॥१३॥
गोकर्णमेव संकल्प्य पूजनाद्रावणेन वै ।

संस्थापित कर दशानन सन्ध्योपासन करने लगा ॥ ७-८-९ ॥ सन्ध्यावन्दन से निवृत्त होकर लोक रावण (संसारको रुलाने वाला) रावण उस श्रृङ्गाग्र को उठाने लगा, परन्तु वज्रतुल्य होकर जमे हुए हारिण श्रृङ्ग को उखाड नशका ॥ १० ॥ वज्रकल्प होकर हरिण श्रृङ्गाग्र को स्थित देख कर उसको त्याग कर रावणने अपनी राजधानी लङ्का में प्रवेश किया ॥ ११ ॥ भगवान् इन्द्र प्रशस्त तेजस्वी ब्रह्मा के द्वारा अभिषिक्त होकर लीला से स्वयं राज्य का पालन करने लगे ॥१२॥ अथ च रुद्रभक्त रावणने प्रशन्न चित्त से गोकर्ण का रत्नमयतोरणों से प्रदीप्त शिवालय

स च दक्षिणगोकर्ण इति विख्यायते भुवि॥१४॥
अद्याऽपि पूज्यते भक्त्या राक्षसैर्धर्मकांक्षिभिः।
कथितं सर्वमाख्यानं भवद्भिः परिपृच्छितम् १५
इत्येवं कथितं शृङ्गे पुण्यात्पुण्यतरं शुभम्।
कीर्तितं सनकेनेत्थं कुमारेण महात्मना॥१६॥

इति श्रीपशुपतिपुराणे दक्षिणगोकर्ण प्रतिष्ठापनो नाम एकविंशोऽध्यायः॥

पुलस्त्य उवाच—

नेनाम्ना मुनिना पूर्वं पालनात्पुण्यकर्मणा।
अयं हि हिमवत्कुक्षौ नेपाल इति चोच्यते॥१॥

बनाया॥ १३॥ गोकर्ण का ही संकल्प कर रावणने गोकर्ण की पूजा की, इस लिए दक्षिण गोकर्ण के नाम मे भुवन में विख्यात है॥ १४॥ अद्यापि धर्मकांक्षी राक्षस लोग भक्ति पूर्वक गोकर्ण की पूजा करते हैं, इस प्रकार हेमुनियों! आप लोगोंने जो पूछा था वह समस्त उपाख्यान हमने कह दिया॥ १५॥ यह इस रीति से मृगेश्वर के शृङ्ग के विषय में पुण्य से पुण्यतर शुभकथा कही गई और कथावाचक महात्मा सनत्कुमार हैं॥ १६॥

इति एकविंश अध्याय।

पुलस्त्य बोले—पुण्यकर्मा ने नामा मुनि के द्वारा पुरा काल में पालित होने से हिमाचल के अञ्चल में यह नेपाल कहलाता

अथान्यत्संप्रवक्ष्यामि तीर्थं नेपालसम्भवम् ।
प्रकामफलदं पुण्यं सर्वपापप्रणाशनम् ॥ २ ॥
नदी विष्णुपदी चाऽपि चक्रमार्गा च निम्नगा ।
तथा मणिमती चाऽपि तिस्रः पुण्याः सरिद्वराः ३
तासां तु संप्रवक्ष्यामि शक्रतीर्थगतं फलम् ।
क्रमशः श्रूयतां पुत्र पृथक्कामफलप्रदम् ॥ ४ ॥
लुन्तिकाश्रममूले च रुद्रवत्याः समागमे ।
विष्णुपद्या जले स्नानात् शक्रश्च परितुष्यति ५
आर्यातीर्थोदके स्नानाद् ब्रह्मनद्याः समागमे ।
अर्यमा तुष्यते तत्र पार्श्वे तीर्थाभिषेकतः ॥६॥

है ॥ १ ॥ अब नेपाल के तीर्थों के विषय में और भी कहेंगे, जो प्रशस्त फलदायक पुण्यमय एवं पाप नाशक हैं ॥ २॥ विष्णु पदी (विष्णु मती , नदी, चक्र मार्गा (वाग्वती) तथा मणि मती मनोहरा) ये तिन पुण्य नदियाँ नदियों में श्रेष्ठ हैं ॥ ३ ॥ हे भीष्म ! उनका क्रमशः पृथक् पृथक् कामफलप्रद तीर्थों को तथा शक्र तीर्थ का फल कहेंगे सुनो ॥ ४ ॥ लुन्तिकाश्रम के मूल में रुद्रवती के समागम में तथा विष्णुपदी के जल में स्नान करने से शक्र (इन्द्र) सन्तुष्ट होते हैं ॥ ५॥ ब्रह्मनदी के समागम में आर्यातीर्थ के जल में स्नान करने से तथा उस के पास में अभि-

अत ऊर्ध्वप्रदेशे तु कटके पर्वतस्य तु ।
तीर्थं ब्रह्मबिलं गत्वा ब्रह्मणो वरदो भवेत् ॥७॥
दर्यां सरलकीर्णायां मृगशृङ्गस्य भूभृतः ।
बलाकारूपमाश्रित्य यत्र धर्मो व्यवस्थितः ॥८॥
बलाकातीर्थमासाद्य ब्राह्मणं यस्तु भोजयेत् ।
नरके मग्नमप्यङ्गं पितरं त्रायते नरः ॥ ९ ॥
स्नायते सततं यस्तु तीर्थे पापप्रणाशने ।
प्रभावाद्धर्मराजस्य नरकं स न पश्यति ॥१०॥
बलाकोदकसम्भेदे विष्णुपद्या जले शुभे ।

षेक करने से अर्यमा (सूर्य तथा पितर) सन्तुष्ट होते हैं ॥ ६ ॥ यहाँ से उपर के प्रदेश में तो सिद्धाचल के कटक में ब्रह्म बिल नामक ब्रह्मा के तीर्थ में जाकर वरद होता है ॥ ७ ॥ मृग शृङ्ग (मृगस्थली) पर्वत के सरल कीर्ण (सल्ला के वृक्षों से व्याप्त) कन्दरा में बलाका नामका (कन्याङ कुरुङ) पंक्षीका रूप धर कर जहाँ पर धर्म व्यवस्थित है ॥ ८ ॥ उस बलाका तीर्थ में जाकर जो ब्राह्मण को भोजन कराता है, वह नर नरक में निमग्न अङ्गवाले पितरों को भी तार देता है ॥ ९ ॥ इस पाप नाशक तीर्थ में जो सर्वदा स्नान करता है, वह धर्मराज के प्रभाव से नरक नहीं देखता (नरक में नहीं जाता) ॥ १० ॥ बलाकोदक नदी के तथा विष्णुपदी के सङ्गम के शुभ जल में स्नान करने से मनोरथ

स्नानात्काममवाप्नोति पितरश्चाऽपि तुष्यति ११
नद्या देवेन्द्रमार्गायाश्चन्द्रदीप्तिसमागमे ।
नवलिङ्गाह्वये तीर्थे स्नानात्सिद्धिरवाप्यते ॥१२॥
पादे पर्वतराजस्य मृगशृङ्गस्य चैव हि ।
अमोघशिखरे रम्ये यक्षासुरनिकेतने ॥१३॥
नाम्ना सुवर्णधाराख्या नदी यक्षविलोद्गता ।
तस्याः प्रपतने स्नानाद्यक्षलोकं स गच्छति १४
सुवर्णधारासम्भेदे शक्रमार्गाजले शुभे ।
प्रयागफलमाप्नोति स्नानान्मासैकमात्रतः ॥१५॥
उत्पादिता विशालेन नदी यस्मात्प्रकीर्तिता ।

फल प्राप्त कर पितरों को भी तार देता है ॥ ११ ॥ देवेन्द्र मार्गा तथा चन्द्रदीप्ति के समागम में नवलिङ्ग नामक तीर्थ में स्नान करने से सिद्धि प्राप्त होती है ॥ १२ ॥ पर्वतराज मृगश्रृङ्ग के पाद में रमणीय यक्ष तथा असुरों के निवास रम्य अमोघशिखर पाद में सुवर्णधारा नाम की नदी यक्षबिल से निकली है, उस के प्रपात में स्नान करने से यक्ष लोक में जाता है ॥१३-१४॥ सुवर्णधारा के सङ्गम पर इन्द्रमार्गा के जल में एक मास मात्र स्नान करने से प्रयाग का फल प्राप्त करता है ॥ १५ ॥ विशालने उत्पन्न किया, जिस से कावीरा तथा विशाला नाम

कावीरा चेति विख्यातं शिवक्षेत्रं भविष्यति १६
अत्राऽपि च कृतस्नानाच्छङ्करः परितुष्यति ।
सेवयेत्सततं यस्तु स्वर्गस्तस्य न दुर्लभः ॥१७॥
कावीरोदकसम्भेदे मणिमत्या जले शुभे ।
स्नायते विधिना यस्तु विशालभवनं व्रजेत् १८
भद्राचलस्थिते रम्ये बकाश्रमसमीपतः ।
भद्रनद्याः शुभे तीर्थे गौरीस्नानं भविष्यति १९
अत्र गत्वा शिलामूर्तिं योऽर्चयेत्सुरसुन्दरीम् ।
सेवयेत्सततं यस्तु तस्य स्वर्गफलं भवेत् ॥२०॥
वीरावतरणे तीर्थे रुद्रनद्याः समागमे ।
स्नायते विधिना यस्तु वीरलोकं स गच्छति २१

से प्रसिद्ध शिव क्षेत्र होगा ॥ १६ ॥ यहाँ भी स्नान करने से भगवान् शिव सन्तुष्ट होते हैं, सर्वदा सेवाकरने वाले के लिए तो स्वर्ग दुर्लभ नहीं है ॥ १७ ॥ कावीरा के सङ्गम में मणिमती के शुभ जल में जो स्नान करता है, वह विशाल भवन में जाता है ॥ १८ ॥ भद्राचलस्थ रमणीय बकाश्रम के समीप भद्रनदी के शुभ तीर्थ में गौरी स्नान होगा ॥ १९ ॥ यहाँ जाकर शिलामूर्तिमती सुन्दरी का पूजन जो करेगा और सदा सेवा करेगा उस को स्वर्ग फल प्राप्त होगा ॥ २० ॥ रुद्र

तत्रावतरेत नित्यं हनुमान् पर्वपर्वसु ।
तीर्थाभिषेचनात्तत्र कामसिद्धिं स गच्छति २२
वीरभद्रं समभ्यर्च्य येऽपि स्नायन्ति मानवाः ।
स्नानार्थं ये च गच्छन्ति तेऽश्वमेधफलं भवेत् २२

इति श्रीपशुपसितुराणोक्त तीर्थानन्दपुराणे द्वाविंशोऽध्यायः ॥

श्रीपशुपत्यष्टक ॥

शङ्कर त्रिदशनाथ दयालो भाललोचन हर त्रिपुरारे । अच्युताऽव्यय कलाधरमौले मानसं पशुपते हर दुःखम् ॥ १ ॥ कालकाल करुणामय शूलिन् कान्तकाय कलिनाशनमूर्त्ते । कालकूटकलिताऽसितकण्ठ मानसं पशुपते० ॥ २ ॥ केशवप्रिय पिशङ्गकपर्दीन् पार्वतीश्वर

नदी के सङ्गम पर वीरावतरण तीर्थ में जो विधि से स्नान करता है, वह वीर लोक में जाता है ॥ २१ ॥ उस तीर्थ में हनुमान् पर्व पर्व में उतरते हैं, इस तीर्थ में अभिषेक करने से कामनासिद्धि होती हैं ॥ २२ ॥ इस तीर्थ में वीरभद्र की पूजा कर जो मनुष्य स्नान करते हैं और जो स्नान के लिए प्रस्थान मात्र भी करते हैं वे अश्वमेध का फल प्राप्त करते हैं ॥ २३ ॥

इति श्री पशुपति पुराणोक्त तीर्थानन्द पुराणे द्वाविंशोऽध्यायः

(पूर्वार्धखण्ड)

पिनाकधरेश । मन्मथप्रमथ कासविकासिन्
मानसं पशुपते० ॥३॥ कुन्दहीरकसुधाकरगौर
निष्कलङ्क निखिलागमवेद्य । त्र्यक्ष निर्गुण
गुणेश्वर जिष्णो मानसं पशुपते० ॥४॥
पुण्यकीर्त्तन पुराण पुरारे पूर्णरूप पुरुषोत्तम
पुण्य । पञ्चवक्त्र पुरुष प्रमथेन्द्र मानसं
पशुपते० ॥ ५ ॥ भोगिभूषणविभूषितभोग
भूतिशोभिततनो हरिकेश । भक्तहृत्कमलवेश्म
निवासिन् मानसं पशुपते० ॥६॥ शुद्धभावन-
तकन्धरलोकबृन्दवाञ्छितफलप्रद शम्भो ।
सृष्टिपालननयैकनिदान मानसं पशुपते०॥७॥
दुष्टनिर्दलन निर्जर देव स्वर्णदीभुवनशेखर
शर्व । वामदेव मतिगम्य महात्मन् मानसं
पशुपते० ॥ ८ ॥ शङ्कराष्टकमिदं सुमनोज्ञं
रोगशोककलहार्तिविनाशम् । यः पठेत्सकल
वाञ्छितसिद्धिस्तस्य तुष्ट इह शङ्करदेवः ॥९॥

इति श्रीशङ्कराष्टक (पशुपत्याष्टक) ॥

सनत्कुमार उवाच—

अथान्यत्संप्रवक्ष्यामि तीर्थं पूर्वोक्तमेव च ।
प्रकामफलदं पुण्यं सुरासुरनमस्कृतम् ॥ १ ॥
वाग्वत्या मणिमत्याश्च सम्भेदे लोकपूजिते ।
गच्छामीत्युक्तमात्रेण भूयात्पापप्रणाशनम् ॥२॥
सम्भेदे मणिमत्यास्तु गन्तुं यावत्कृतं पदम् ।
तावद्वर्षशतं स्वर्गे मोदते शिवभक्तिमान् ॥३॥
वाग्वत्या मणिमत्याश्च सम्भेदे लोकपूजिते ।
स्नायते विधिना यस्तु पुण्यवान् भुवि कीर्त्यते ४
तत्समीपे समुद्भूता रुद्रधारेति चोच्यते ।
कल्पिता देवदेवेन लोकानुग्रहकारिणा ॥ ५ ॥

सनत्कुमार बोले— अथच सुर एवं असुरों का बन्दनीय पूर्वोक्त ही और प्रशस्त पुण्य तीर्थ का वर्णन करेंगे ॥ १ ॥ वाग्वती एवं मणिमती के लोकपूज्य संगम में 'जाता हूँ' इतना कहने मात्र से पापनाश होता है ॥ २ ॥ इस वाग्वती मणिमती के त्रिवेणी संगम में जाने के जितने पदन्यास (कदम) किये जाते हैं, उतने ही सौ वर्षों तक शिवभक्त स्वर्ग में मुदित होता है ॥ ३ ॥ वाग्वती एवं मणिमती के लोकपूजित संगम में जो विधि से स्नान करता है, वह संसार में पुण्यवान् कहलाता है ॥ ४ ॥ उसी के समीप में प्रादुर्भूत रुद्रधारा नदी को लोकानुग्रहकारी महादेव

भुक्तिमुक्तिप्रदं पुण्यं शिवमायोपलक्षितम् ।
रुद्रधारोदयं दृष्ट्वा सर्वपापेर्विमुच्यते ॥ ६ ॥
गयाया नैमिषाद्वापि कुरुक्षेत्राच्च पुष्करात् ।
स्नानं दशगुणं ज्ञेयं मणिमत्याः समागमे ॥ ७ ॥
ब्रह्मवक्त्रसमुद्भूता तीर्थमाता सरस्वती ।
सोममण्डलसम्भूता गङ्गा त्रैलोक्यपावनी ॥ ८ ॥
गौरीस्वेदसमुद्भूता कौशिकी कामदायिनी ।
वाग्वती तु सरिच्छ्रेष्ठा महादेवसमुद्भवा ॥ ९ ॥
वाग्वतीं सरितां श्रेष्ठां यत्र यत्राऽवगाहते ।

ने स्वयं कल्पित की है ॥ ५ ॥ भगवान् शिव की माया से उपलक्षित भुक्तिमुक्तिदायक पुण्यतम रुद्रधारोदय का दर्शन कर समस्त पापों से मुक्त हो जाता है ॥ ६ ॥ गया नैमिषारण्य कुरुक्षेत्र पुष्करराज आदि तीर्थों से भी शतगुण पुण्य वाग्वती मणिमती रुद्रधारा के त्रिवेणी संगम में स्नान करने से होता है ॥ ७ ॥ व्रह्मा के मुख से प्रकट हुई समस्त तीर्थों की माता सरस्वती सोममण्डल में प्रादुर्भूत त्रैलोक्यपावनी गंगा, भगवती गौरी के प्रस्वेद से उद्भूत कामना सिद्धिकारिणी कौशिकी है और नदियों में उत्तम वाग्वती तो महादेव के सुख से निकली है ॥ ८ ॥ इस पवित्र वाग्वती में जहाँ जहाँ स्नान करता है, वहाँ २ सर्वत्र वाजपेय एवं अश्वमेध यज्ञ का फल जानना चाहिए ॥ ९ ॥ पुरा

तत्र तत्र फलं विद्याद्वाजपेयाश्वमेधयोः ॥ १० ॥
तत्सत्यमेव नियतं यदुक्तं ब्रह्मणा पुरा ।
महादेवमुखोद्भूते किंन सम्भाव्यते फलम् ११
तदहं सम्प्रवक्ष्यामि स्तोत्रं कामफलप्रदम् ।
कीर्तनाच्छ्रवणाद्वापि पुण्यं भवति विस्तरम् १२

ॐ नमः श्रीवाग्वत्यै

या दैत्यराजपरितोषितदेवदेव-
मुक्ताट्टहासनिकरामलवारिधारा ।
हेमारविन्दरजसारुणितोर्मिमाला
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १३ ॥

काल में वराह पुराण में जो ब्रम्हा ने कहा था वह सत्य है, क्योंकि महादेव के मुख से उत्पन्न पदार्थ में कौनसा फल नहीं है ? अर्थात् सब कुछ है ॥ १० ॥ इस से हम कामनानुकूल फलदायक वाग्वती का स्तोत्र कहेंगे, जिस के कीर्तन (पाठ) से तथा श्रवण करने से भी पुण्य बिस्तार होता है ॥ १२ ॥

ॐ नमः श्री वाग्वत्यै, इत्यादि स्तोत्र है । इस प्रकार के अनेक मनोहर स्तोत्र हैं । इनका अनुवाद ग्रन्थविस्तार भय से नहीं किया । असमञ्जस होने पर भी यथाबलं मूल पाठ ही रखा गया है । इति पुलस्त्य भाषिता वाग्वती स्तुति ॥

या कल्पिता पशुपतेः स्नपनाय नित्यं
मन्दाररेणुकलिकामलपुण्यतोया ।
कुन्देन्दुशंखधवलामलफेनमाला
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १४ ॥

या पुष्पपत्रपतनाकुलतीररेखा
मुक्तोत्पला मरकतोपलतुल्यभासा ।
चक्राङ्कयुग्मशबलीकृततीररेखा
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १५ ॥

या निम्नगा सुरसरिज्जलसन्निकाशा
शैलाधिराजकटकोपलसंस्खलन्ती ।
सोपानपङ्क्तिसदृशी त्रिदशालयस्य
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १६ ॥

या पूजिता विकसितैरपि पारिजातै-
स्तीरोपलेषु सततं सुरसुन्दरीभिः ।
नागाङ्गनावदनपङ्कजसक्तफेना
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १७ ॥

या मानिता मकरकेतुवचोभिरुच्चैः
संरक्षणापहरणादपि चन्द्रवत्याः ।
देवाङ्गनाकुचतटाहतवीचिमाला
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १८ ॥

या यक्षकिन्नरमहोरगपूजनीया
सम्पूजिता सुरवधूभिरनेकपुष्पैः ।

सिद्धाङ्गनाङ्गपरिमुञ्चनपुण्यपाथाः
सा वाग्वती दिशतु कामफलं नराणाम् ॥ १९ ॥

या सर्वकामफलदाऽखिलसाधकस्य
क्रीडानुरागजननी नरकामिनीनाम् ।
सम्पूजिता सुरगणैरपि पुष्पवृष्ट्या
सा वाग्वती दिशतु कामफलं नराणाम् ॥ २० ॥

या शम्भोर्वृषभेन्द्रपङ्कजमुखप्रस्यन्दनादागता
गीर्वाणारित्रिसूदने पशुपतौ प्राप्ता परामुन्नतिम् ।
कूर्मग्राहझषाकुलाऽतिचपला गङ्गेव नाकप्रदा
सैषा पुण्यतमा पुनाति सलिलैर्लोकं सदा वाग्वती ॥ २१ ॥

पतिं बलाद्यदमृतं वृषभेन पूर्वं
तन्नन्दित प्रविततं भुवनेयदस्तम् ।
तस्मात्सुरैर्मुनिजनैर्मनुजस्त्रिवेणी
संसेव्यते सततमप्सरसां च वृन्दः ॥ २२ ॥

तां वाग्वतीं ऋतुशताधिकपुण्यतोयां
दृष्ट्वा नराः कुसुमरेणुकृताङ्गरागाम् ।
निर्धूतकल्मषपङ्कपायविशुद्धदेहाः
सद्यो भवन्ति पुनरेव सुखानुरागाः ॥ २३ ॥

पद्मोत्पलैर्बकुलचम्पकनागपुष्प-
रामोदितं तव पयस्तटजैः प्रसूनैः ।
फेनाकुलैर्विविधचित्रतरस्तरङ्गै-
र्मन्दाकिनीव सुरलोकगतं पुनाति ॥ २४ ॥

नेपालमण्डलसमस्तनिरस्तदुःखा
या वाग्वती त्रिभुवनं त्रयमातवापम् ।
सेयं पुनाति बहुधा बहुशापमुक्ता
त्यक्त्वा नराः स्वजनबन्धुभिराप्तवर्गैः ॥ २५ ॥

स्नानावगाहनरता जलपानशीला
गङ्गेव पासि सततं पतितांश्च तोये ।
आसंश्रिताघमपि न स्मरणप्रयुक्ता
धर्मात्मजं तव जलं मुनयः पठन्ति ॥ २६ ॥

ऋक्षेण सिंहगजगण्डवरा विहङ्गा
अन्येऽपि ते तव जलं प्रसुतास्तुवास्तु ।
ब्रह्मेन्द्रवह्निविधुरुद्रसमानरूपा-
स्ते यान्ति रुद्रनिलयं प्रविमुक्तशोकाः ॥ २७ ॥

अन्यस्तुवस्तुपरमस्तुतिरप्रमेया
या पाति निर्मलजला सकलं त्रिलोकम् ।
मुक्तामिमां पशुपतेः स्तवनाय नित्यं
संप्रस्थिताऽसि विरयोऽप्रतिमं विभूत्यै ॥ २८ ॥
(सम्प्रस्थिता गिरिवरात्प्रथमा विभूतिः)

इतिपशुपतिपुराणोक्तवाग्वतीप्रशंसायां पुलस्त्यभाषिता
वाग्वतीस्तुतिः ॥

अथादित्योपुराणोक्तशिवसहस्रनाम

शौनक उवाच—

सुदर्शनाख्यं यच्चक्रं लब्धवांस्तत्कथं हरिः ।
महादेवाद्भगवतः सूत तद्वक्तुमर्हसि ॥ १

सूत उवाच —

देवासुराणामभवत्संग्रामोऽद्भुतदर्शनः ।
देवाश्च निर्जिता दैत्यैर्विष्णुं शरणमागताः ॥ २
स्तुत्वा तं विविधैः स्तोत्रैः प्रणम्य पुरतः स्थिताः ।
भयभीताश्च ते सर्वे दानवैः क्लेशिता भृशम् ॥ ३
तान्दृष्ट्वा प्राह भगवान्देवदेवो जनार्दनः ।
किमर्थमागता देवा वक्तुमर्हथ साम्प्रतम् ॥ ४
वचः श्रुत्वा हरेर्देवाः प्रणम्योचुः सुरोत्तमम् ।
निर्जिता दानवैः सर्वैः शरणन्त्वामिहागताः ॥ ५
गतिस्त्वमेव देवानां त्राता त्वं पुरुषोत्तम ।
हन्तुमर्हसि तान्क्षिप्रमवध्यान्वारिजेक्षण ॥ ६
जलन्धरवधार्थाय यच्चक्रं शूलपाणिनः ।
महादेवाच्च तल्लब्ध्वाघ्नत तेन महावलान् ॥ ७

तेषां तद्वचनं श्रुत्वा भगवान्वारिजेक्षणः ।
आह देवांस्तथा नूनं हनिष्यामीति सुव्रताः ॥ ८
हिमवत्पर्वतं गत्वा पूजयामास शङ्करम् ।
लिङ्गं तत्र प्रतिष्ठाप्य स्नाप्य गन्धोदकैः शुभैः ॥९
त्वरिताख्येन रुद्रेण संपूज्य च महेश्वरम् ।
ततो नाम्नां सहस्रेण तुष्टाव परमेश्वरम् ॥ १०
प्रतिनामानि पद्मानि तैरिष्ट्वा वृषभध्वजम् ।
भवाद्यैर्नामभिर्भक्त्या स्तोतुं समुपचक्रमे ॥ ११
ॐ भवः शर्वो हरो रुद्रः पुष्कलो मुग्धलोचनः ।
अग्रगण्यः सदाचारः सर्व्वः शम्भुर्म्महेश्वरः ॥ १२
ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात् ।
वरीयान् वरदो वैद्यः शङ्करः परमेश्वरः ॥ १३
गङ्गाधरः शूलधरः परार्थैकप्रयोजनः ।
सर्व्वज्ञः सर्व्वदेवादिर्गिरिधन्वा जटाधरः ॥ १४
चन्द्रापीडश्चन्द्रमौलिर्व्विद्वान् विश्वो महेश्वरः ।
वेदान्तसारसन्दोहः कपाली नीललोहितः १५

ध्यानाध्यायोऽपरिच्छेद्यो गोरीभर्त्ता गणेश्वरः ।
अष्टमूर्त्तिर्व्विश्वमूर्त्तिस्त्रिवर्ग्गः स्वर्गसाधनः ॥१६
ज्ञानगम्यो दृढः प्रज्ञो देवदेवस्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढः शिवः ॥ १७
विश्वरूपो विरूपाक्षो वागीशः श्रुतिमातृकः ।
शूलपाणिविसम्वादी वृषांकोवृषवाहनः ॥ १८
ईशः पिनाकी खट्वाङ्गी चित्रवेशश्चिरन्तनः ।
मनोमयो महायोगी स्थिरो ब्रह्माङ्गधूर्जटिः ॥ १९
कालकालः कृत्तिवासा सुभगः प्रणवात्मकः ।
नागचूडः सुचक्षुष्यो दुर्व्वासा पुरशासनः ॥ २०
मृगायुधः स्कन्दगुरुः सुरेशः सूर्यतापनः ।
धर्म्मधामा क्षमाक्षेत्रं भगवान्भगनेत्रहृत् ॥ २१
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियंवदः ।
दान्तो दयाकरो दक्षः कपर्दी कालकालनः २२
श्मशाननिलयस्तिष्यः श्मशानस्थो महेश्वरः ।
लोककर्म्मा भूतपतिर्म्महाकर्म्मा महौषधिः ॥ २३

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
नीतः सुनीतः शुद्धात्मा यामः सोमधरः शिखी २४
सोमपामृतपः सौम्यो महानीतिर्म्महामतिः ।
अजातशत्रुरालोकः सम्भाव्यो हव्यवाहनः ॥२५
लोककारो वेदकरः सूत्रधारः सनातनः ।
महर्षिः कपिलाचार्यो विश्वदीप्तिर्व्विरोचनः ॥२६
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिवस्तुदः ।
धात्रीधामकरः सर्व्वः सर्व्वगः सर्व्वगोचरः ॥२७
ब्रह्मसृड्विश्वसृड्सर्व्वाकर्णिकारप्रियः शिवः ।
शाखो विशाखो गोशाखः शिवो विषमनुत्तमः
गंगाप्रभोऽन्धको भव्यः पुष्कलः स्थपतिः स्थितः ।
विजितात्मा विधेयात्मा भूतवाहनसारथिः ॥ २९
सगणो गणकाग्रश्च सुकीर्तिर्द्धिनसंचयः ।
कामदेवः कामपालो भस्मोद्धूलितविग्रहः ॥ ३०
भस्मप्रियो भस्मशायी कामी काम्यः कृतागमः ।
समावर्त्तो निवृतात्मा धर्म्मपुञ्जः सदाशिवः ॥ ३१

अकलश्च चतुर्व्बाहुः सर्व्वोपास्योदुरासदः ।
दुर्ल्लभो दुर्ग्गमो दुर्ग्गः सर्व्वायुधविशारदः ३२
अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्द्धनः ।
शुभाङ्गो योगसारंगो जगदीशो जनार्द्दनः ॥३३
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ।
हिरण्यरेतास्तरणिर्म्मरीचिश्च हिमालयः ॥ ३४
महाह्रदो महागर्त्तः सिद्धवृन्दादिवन्दितः ।
व्याघ्रचर्म्मधरो बाली महाभूतो महानिधिः ॥ ३५
अमृतांशोऽमृतवपुः पञ्चयज्ञः प्रभञ्जनः ।
पञ्चविंशतितत्त्वस्थः पारिजातः परावरः ॥ ३६
सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्न्निधिः ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥३७
आत्मदक्षः परक्षामो ज्ञानबालश्च वत्सलः ।
प्रमाणभूतो दुर्ज्ञेयः सुवर्णो वायुवाहनः ॥ ३८
धनुर्द्धरो धनुर्व्वेदो गुणराशिर्गुणाकरः ।
अनन्तदृष्टिरानन्दो द्वन्द्वोदमयिता दमः ॥ ३९

अभिवाद्यो महाकायो विश्वकर्म्मविशारदः ।
वीतरागोविनीतात्मा तपस्वी भूतवाहनः ॥ ४०
उन्मत्तवेशः प्रच्छन्नो जितकायो जनप्रियः ।
कल्याणप्रकृतिः कल्पः सर्व्वलोकप्रजापतिः ॥४१
तरस्वी तारको धीमान्प्रधानप्रभुरव्ययः ।
लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ४२
वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः ।
राहुः सूर्यः शनिः केतुर्विरागो विद्रुमच्छविः ॥४३
भक्तिगम्यः परंब्रह्म मृगवाणार्पकोशयः ।
अद्री तन्द्रयालयस्थानं परमात्मा जगत्पतिः ४४
सर्व्वकर्म्मात्मकस्त्वष्टा माङ्गल्योमङ्गलप्रदः ।
महातपा दीर्घतपाः स्थविष्ठः स्थविरुद्भवः ॥ ४५
अहः संवत्सरो ऽव्यालोऽव्यालप्राणः परन्तपः ।
संवत्सरकरो मन्त्रः प्रत्ययः सर्व्वदर्शनः ॥ ४६
अजः सर्व्वेश्वरः सिद्धो महारेता महाबलः ।
योगी योग्यो महादेवः सिद्धिर्व्वार्य्यवादिरम्भिद् ४७

वसुर्व्वसुमनाः सत्यः सर्व्वपापहरो हरः ।
अमृतः शाश्वतःशान्तो बाणहस्तः प्रतापवान् ४८
कमण्डलुधरो धन्वी वेदान्तो वेदविन्मुनिः ।
भ्राजिष्णुर्भोजनो भोक्ता लोकनाथो दुरावरः ४९
अतीन्द्रियो महामायः सर्व्वापाशश्चतुष्पथः ।
कालो योगी महानादो महोत्साहो महाबलः ५०
महाबुद्धिर्म्महावीर्यो भूतचारी पुरन्दरः ।
निशाचरप्रेतचारी महाशक्तिर्म्महाद्युतिः ॥ ५१
अनिर्देश्यवपुः श्रीमान्सर्व्वहार्यमितो मतिः ।
बहुश्रुतो बहुमयो नियतात्मा निजोद्भवः ॥ ५२
ओजस्तेजोद्युतिधरो नर्त्तकः सर्वलासकः ।
नीतिर्घण्टाप्रियो नित्यंप्रकाशात्मा प्रतापनः॥५३
ऋद्धः स्पष्टाक्षरो मन्त्रः संग्राह्यः सारदः स्तवः ।
युगादिकृद्युगावर्त्तो गम्भीरो वृषवाहनः ॥ ५४
इष्टो विशिष्टः शिष्टेष्टः शरभः शवरोधनः ।
अपान्निधिरधिष्ठानविजयो जयकालवित् ॥ ५५

प्रतिष्ठितप्रमाणज्ञो हिरण्यकवरो हरिः ।
विलोचनः सुरगणोविद्यैशोविबुधाश्रयः ॥ ५६
बलरूपो बलोन्माथी विवर्त्तो गहनो गुहः ।
करणं कारणं कर्त्ता सर्व्वबन्धविमोचनः ॥ ५७
युक्तिकृन्नन्दकी चक्री शान्तः पुरुपुरञ्जयः ।
कैलाशपतिः कामारिः सविता रविलोचनः ५८
विद्वत्तमो वीतनयो विश्वकर्म्मनिवारितः ।
नित्यो नियितकल्याणः पुण्यश्रवणकीर्त्तनः ५९
पुरासहो विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तरको दुष्कृतिहा दुर्द्धर्षो दुःसहोभयः ॥ ६०
अनादिर्भूर्भुवो लक्ष्मी किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वभर्त्ता सुचिरो रुचिराङ्गदः ॥ ६१
जननो जनजन्मादिः प्रीतिमान्नीतिमान्नयः ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥ ६२
प्रणवः सत्पथाचारो महाकायो महाधनुः ।
आत्मदीपो महादेवः सकलागमपारगः ॥ ६३

तत्त्वन्तत्त्वविदैकात्मा विभूतिर्भूविभूषणः ।
रुद्रो वै ब्रह्मविद्विष्णुर्जन्ममृत्युर्जरातिगः ॥ ६४
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो मेघविक्रमः ।
महेन्द्रो दुर्भरः सेनिर्यज्ञाङ्गो यज्ञवाहनः ॥ ६५
षञ्चब्रह्म समुत्पत्तिर्व्विश्वथो विमलोदयः ।
आत्मयोगी ह्यनाद्यन्तः षड्त्रिंशः सप्तलोकधृक् ।
गायत्री बल्लभः पांशुर्व्विश्वावासो प्रभाकरः ।
शिशुर्गिरिचरः सम्राट् ऋषिणः सुरशस्त्रुहा ६७
अमयोरिष्टमथनो मुकुन्दो विगतज्वरः ।
स्वयंज्योतिरनुज्योतिरात्मज्योतिरचञ्चलः ॥६८
पिङ्गलः परितस्मश्रुः शास्त्रनेत्रत्रयीतनुः ।
ज्ञानस्कन्धो महाज्ञानी वीरोत्पत्तिरुपप्लवी ॥६९
भगो विवस्वानादित्यो योगाचार्यो दिवस्पतिः ।
उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ॥ ७०
नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाशयः ।
पवित्रपाणिः पापारिर्गतिर्भूयः सह्योगतिः ॥७१

हृत्पुण्डरीकमालीनः शुक्रसेनो वृषाकपिः ।
तुष्टो ग्रहपतिः कृष्णः समयोनर्थनाशनः ॥ ७२
अधर्म्मशत्रुरक्षय्यः पुरुहूतः पुरुस्तुतः ।
ब्रह्मगर्भो बृहद्बीजो धर्म्महेतुर्द्धनागमः ॥ ७३
जगद्धिभेयी सुगतः कुमारः कुशलागमः ।
हिरण्यवर्णो ज्योतिष्मानुपेन्द्रस्तिमिरापहः ७४
अहोगः स्वपनाध्यक्षो विश्वामित्रो द्विजेश्वरः ।
ब्रह्मज्योतिः सुबुद्धात्मा ब्रह्मज्योतिरनुत्तमः ॥७५
मातामहो मातरिश्व महापन्नगहारधृक् ।
पुलस्त्यः पुलहोऽगस्त्यो जातकर्ण्णः परायणः ७६
निरावरणविज्ञानो विरिञ्चो विष्टराशनः ।
आत्मभूरनिरुद्धोत्रिर्ज्ञानमूर्त्तिर्म्महायशाः ॥७७
लोकरूढो मुनिर्व्वीरश्चण्डः सत्यपराक्रमः ।
व्यालाकल्पो महाकल्पः कल्पवृक्षः कलाधरः ७८
अलंकरिष्णुरचलो रोचिष्णुर्व्विक्रमोत्तमः ।
आशुः सप्तपतिर्व्वेगी पवनः श्रुतिसारथिः ॥ ७९

असंश्लिष्टोतिथिः शुक्रः प्रमाथी पादपावनः ।
वसुश्रवाः कव्यवाहः प्रतपा विश्वभोजनः ॥ ८०
जयोजयारिशमनो लोहिताश्वस्तनूनपात् ।
पृषदश्वो नभोयोगी सुप्रतीकस्तमिस्रहा ॥ ८१
निदाघस्तपनो मेघः पद्मपूरःपुरञ्जयः ।
सुखानिलः सुनिस्पन्नः सुरार्चिः शिशिरात्मकः
वसन्तो माधवो ग्रीष्मो नभाख्यो द्विजवाहनः ।
मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ॥ ८३
यमदग्निर्ज्जलनिधिर्व्विपाको विश्वकारकः ।
अधरोनुत्तरोज्ञेयो ज्येष्ठोनिश्रेयसाधकः ॥ ८४
शैलोवनोवनदहो दानवारिररिन्दमः ।
चामुण्डी कनकः प्रांशुर्भिशल्ल्यो लोकशल्यहृत् ८५
चतुर्व्वेदश्चतुर्बाहुश्चतुरस्रतरप्रियः ।
आत्मयोगसमाम्नायः तीर्थदेवःशिवालयः ॥८६
वज्ररूपो महारूपः सर्व्वरूपश्चराचरः ।
न्यायनिर्व्वाहको न्यायो न्यायगम्यो निरञ्जनः८७

सहस्रमूर्द्धा देवेन्द्रः सर्व्वशस्त्रप्रभञ्जनः ।
मुण्डो विभूषोविकृतो दण्डी दान्तोगणोत्तरः ८८
धनाध्यक्षः पिङ्गलाक्षो नीलग्रीवो निरामयः ।
सहस्रबाहुः सर्व्वैशः शरण्यः सर्व्वलोकहृत् ॥८९
पद्मासनः परंज्योतिः परावरपरं फलम् ।
पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ॥९०
परावरज्ञो वरदो वरेण्यस्तु महानघः ।
देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥ ९१
देवासुरमहामन्त्रो देवासुरमहाश्रयः ।
देवाधिदेवो देवर्षिर्देवासुरवरप्रदः ॥ ९२
देवासुरसुरो दिव्यो देवासुरमहेश्वरः ।
सर्व्वदेवमयोचिन्त्यो देवतात्मात्म सम्भवः ॥९३
ईशोनीशः सुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रः वरश्रेष्ठः सर्व्वदेवोत्तमोत्तमः ॥ ९४
शिवध्यानरतोऽसीमोःशिखण्डी पार्व्वतीप्रियः ।
वज्रहस्तः सुविष्टम्भी नरसिंहनिपातनः ॥ ९५

ब्रह्मचारी लोकचारी धर्म्मचारी धनाधिपः ।
नन्दी नन्दीश्वरो नग्नो नग्नव्रतधरःशुचिः ॥९६
लिङ्गाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगावहः ।
स्वयशाः स्वर्ग्गतः स्वर्ग्गः स्वरः स्वरमयः स्वनः९७
ध्वजाध्यक्षो जीवकर्त्ता धर्म्मकृद्धर्म्मविद्धनः ।
दम्भोदम्भा महादम्भः सर्व्वभूतमहेश्वरः ॥९८
श्मशाननिलयस्तिष्य सेतुरप्रतिमाकृतिः ।
लोकान्त रस्पृशोलोक स्त्र्यम्बको भक्तवत्सलः९९
अन्धकारीर्म्महाद्वेषी विष्णुकंधरपाणिकः ।
वीतदोषोऽक्षयगुणो दक्षारिः पूषदन्तहृत् ॥१००
धूर्जटिः खण्डपरशुःसकलोनिष्कलोपमः ।
अकलः सकलाधारः पाण्डुराङ्गो मृडोनटः १०१
पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सामगेयप्रियः क्रूरः पुण्यकीर्त्तिरनामयः ॥१०२
मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ।
जीवितान्तकरोऽनन्तो वसुरेतो वसुप्रदः ॥१०३

सज्जितः सत्कृतिःशान्तः कालकण्ठः कलाधरः।
मानीमानो महाबालः सद्भूतिः सत्परायणः १०४
चन्द्रः संजीवनः शास्ता लोकारूढोऽमराधिपः।
लोकबंधुर्लोकनाथः कृतज्ञः कीर्त्तिभूषणः ॥१०५
अनपायोक्षणः शान्तः सर्व्वशस्त्रभृतांवरः।
तेजोमयो द्युतिधरो लोकनाथोऽग्रणीरणः १०६
सुविस्मितःप्रसन्नात्मा दुर्जयो दुरतिक्रमः।
ज्योतिर्म्मयो जगन्नाथो निराकारो जनेश्वरः १०७
तुम्बीवीणो महाशोको विशोकः शोकनाशनः।
त्रिलोकेशस्त्रिलोकात्मा शुद्धःशुद्धिरधोक्षजः १०८
अव्यक्तलक्षणोऽव्यक्तो व्यक्तोऽव्यक्तो विशाम्पति।
वरशिलो वरगुणो गव्योगव्यायनोमयः ॥१०९
ब्रह्मविष्णुप्रजापालो हंसोहंसगतिर्म्मतः।
वेधाविधाता धाताच स्रष्टाकर्त्ता चतुर्म्मुखः ११०
कैलाशशिखरावासी सर्व्ववासी सदागतिः।
हिरण्यगर्भो गगनः पुरुषः पूर्वजः पिता ॥१११

भूतालयो भूतपतिर्भूतिदो भूवनेश्वरः ।
संयोगी योगवित्स्रष्टा ब्रह्मण्यो ब्राह्मणप्रियः ११२
देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ।
विषमाक्षो विलोमाक्षो वृषदो वृषवर्द्धनः ॥११३
निर्म्मदो निरहंकारो निर्मोहो निरुपद्रवः ।
दर्प्पदो दर्प्पदोद्दृप्तः सर्व्वर्तुपरितर्जकः ॥ ११४
सप्तजिह्वः सहस्रार्चिस्तिर्यक्प्रकृतिदक्षिणः ।
भूतभव्यभवन्नाथः प्रभवो भ्रान्तिनाशनः ॥११५
अर्थोनर्थो महाकोशः परमार्थैकपण्डितः ।
निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्द्दनः ११६
सत्यवान्सात्विकः सत्यः किर्त्तिस्तम्भः कृतागमः ।
अकम्पितो गुणग्राही नैकात्मा नैककर्म्मकृत् ११७
श्रीवल्लभः शिवारम्भः शान्तभद्रः समुन्नतः ।
भूतपो भूतिकृद्भूतिर्भूषणो भूतवाहनः ॥ ११८ ॥
आकाशो भक्तकार्यस्थः कालज्ञानी महापटुः ।
सत्यव्रतो महात्यागी वाञ्छाशक्तिपरायणः ११९

परार्थो भृत्य वरदो विविक्तः श्रुतिसागरः ।
अनिर्व्वण्णो गुणग्राही निष्कलः सकलानिधिः १२०
स्वभावभद्रो मध्यस्थः शत्रुघ्नः शत्रुतापनः ।
शिखण्डी कवची शूली जटी मुण्डी च कुण्डली १२१
मेखली कवची खड्गी माली संसारसारथी ।
अमृत्युः सर्व्वजित्सिंहस्तेजोराशिर्म्महामणिः १२२
अखण्डेयोऽप्रमेयात्मा वीर्यवान्कामदो मदः ।
वेद्यो वैद्योवियद्गोप्ता सशावर मुनीश्वरः ॥ १२३
अनुत्तमो दुरादर्शो मधुरःप्रियदर्शनः ।
सुरेशः शरणं शर्म्मः सर्व्वदेवः सतांगतिः१२४
तालयन्त्रः करंकारी कंकणीकृतवासुकिः ।
महेष्वासो महीभर्त्ता निष्कलंको विश्रृंखलः १२५
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विसृतः संवृतःशिल्पी व्यूढोरस्को महाभुजः१२६
परंज्योतिर्निरातंको नरनारायणप्रियः ।
निर्न्नयोनिः प्रपञ्चात्मा निर्व्यग्रोव्यग्रणाशनः१२७

स्तव्यः स्तवप्रियः स्तोता व्याप्तो मूर्त्तिरनाकुलः ।
निरवद्यपदो नादो विद्याराशिरकृत्रिमः ॥ १२८
प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः ।
ध्येयो धैर्योऽग्रधुर्यो धाशंकलः सर्व्वरीपतिः १२९
परः सर्व्वगुरुर्व्याप्तिः शुचिराश्रितवत्सलः ।
रसोरसज्ञः सारज्ञः सर्व्वतत्वावलम्बनः ॥ १३०
एवं नाम्ना सहस्रेण तुष्टाव गिरिजापतिम् ।
संपूज्य परया भक्त्या पुण्डरीका द्विजोत्तमाः १३१
जिज्ञासार्थं हरेर्भक्तिं कमलेषु शिवःस्वयम् ।
तत्रैकं गोपयामास कमलं मुनिपुङ्गवाः १३२
हृतंपुष्पं तदाविष्णुश्चिन्तयत्किमिदंत्विति ।
ज्ञात्वाऽत्मनोक्षमुद्धृत्य पूजयामासशंकरम्॥१३३
अथ ज्ञात्वा महादेवो हरेर्भक्तिं सुनिश्चलाम् ।
प्रादुर्भूतो महादेवो मण्डलात्तिग्मदीधितिः ॥१३४
कोटिसूर्यप्रतीकाशस्त्रिनेत्रश्चन्द्रभूषणः ।
शूलटंकगदाचक्रं कुण्डपाशधरोविभुः ॥ १३५

वरदोभयपाणिश्च सर्व्वाभरणभूषितः ।
तंदृष्ट्वा देवदेवेशं भगवान्पुरुषोत्तमः ॥ १३६
पुनर्ननाम चरणौ दण्डवच्छूलपाणिनः ।
दृष्ट्वा शंभुन्ततोदेवा दुद्रुवुर्भयविह्वलाः ॥१३७
चचार ब्रह्मभुवनं चकंपे च वसुन्धरा ।
अधश्चोर्द्ध्वमतःप्रान्ते ददाह शतयोजनम् ॥१३८
शम्भोर्भगवतस्तेजस्तं दृष्ट्वा प्रहसन् शिवः ।
अब्रवीच्छार्ङ्गिणं विप्रा कृताञ्जलि पुटंस्थितम्१३९
देवकार्यमिदंज्ञातमिदानीं मधुसूदन ।
दिव्यं ददामि ते चक्रमद्भुतं तत्सुदर्शनम् ॥१४०
हितार्थं सर्व्वदेवानां निर्म्मितं यन्मयापुरा ।
गृहीत्वा तद्रणेदैत्याञ्जहि विष्णो ममाज्ञया ॥१४१
एवमुक्त्वा ददौचक्रं सूर्यायुतसमप्रभम् ।
नेत्रञ्चपद्मसदृशं विष्णवे प्रभविष्णवे ॥ १४२
लोकेषु पुण्डरीकाक्ष इतिख्यातिं गमिष्यति ।
पुनस्तमब्रवीच्छम्भुर्नारायणमनामयम् ॥१४३

वरानन्यान्सुरश्रेष्ठ वरयस्व यथेप्सितान् ।
एवं शम्भुर्निगदितं श्रुत्वा देवोजनार्द्दन ॥१४४
अब्रवीत्खण्डपरशुं प्राञ्जलिः प्रणयान्वितः ।

वीष्णुरूवाच—

भगवन्देवदेवेश परमात्मन् शिवाऽव्यय ॥१४५
निश्चला त्वयि मेभक्तिर्भवत्विति वरो मम ।

महादेव उवाच—

मयि भक्तिर्दृढा विष्णो भविष्यति तवानघ ॥१४६
अजेयस्त्रिषु लोकेषु मत्प्रसादाद्भविष्यति ।

सूत उवाच—

एवं दत्वा वरं शंभुर्विष्णवे परमात्मने ॥ १४७
अन्तर्हितो द्विजश्रेष्ठा इतिदेवो ब्रवीद्रविः ।
नाम्नासहस्रं यद्दिव्यं विष्णुना समुदीरितम् ॥१४८
यःपठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते ।
अश्वमेधसहस्रस्य फलंभवति निश्चितम् ॥ १४९

पठते सर्व्वभावेन विद्या च महती भवेत् ।
जायते महदैश्वर्यं शिवस्य दयितोभवेत् ॥ १५०
दुस्तरे जलसंघाते तज्जलं स्थलतां व्रजेत् ।
हारायन्ते महासर्प्पाः सिंहक्रीडा मृगायते ॥१५१
तस्मान्नाम्ना सहस्रेण स्तोतव्यो भगवान्शिवः ।
प्रयच्छतेऽखिलान्कामान्देहान्ते च परांगतिम्॥१५२

इत्यादित्यपुराणोक्तशिवसहस्रनामस्तोत्रम् ।

अथ चतुष्षष्ठिशिवलिङ्ग-
महात्म्य

नेपाल राज्यान्तर्गत चतुष्षष्टि शिवलिङ्ग यात्राको वर्णन गरिन्छ। सबै तीर्थ-स्थान, शिवलिङ्गको स्थानको प्रस्थान, लिंगहरूको दर्शनार्चन (षोडसो पचार पूजन) जागरणादि क्रिया एकै समान मानिएको छ, त्यसको फल पनि अभिष्टछ। यसको वर्णनलाई अरु शास्त्र पुराणहरूले पनि मान्यता दिएको छ ।

आदौ आर्या तीर्थ–स्नान तत्पश्चात क्रमशः श्री पशुपति मन्दिर पूर्वमा रक्तगणेशदर्शन पूर्वक किर्तिमुख भैरव, वृषभ, वासुकि

वत्सला, छत्रपाल, श्री पशुपति, श्री गुह्येश्वरी, भक्तपुर सूर्यविनायक, सांगोपत्यका गणेश दर्शन गरि तत्पश्चात—

(१) आदि लिंग **श्री कुशेश्वर शिवलिंग** पूर्व २ नं दुम्जा मा:— यो स्थान देखि पूर्व दुईशय धनुमा लीला नदी (रोसी) र स्वर्ण कौशिकाको संगममा दुर्गा तीर्थ छ। यी देवताले ब्रह्माले सृष्टि गर्नाका इच्छाले महादेवको आराधना गर्दा उत्पन्नभै सृष्टिको अधिकार दिनु भएकोछ। वहाँकै उपासनाद्वारा इन्द्रादि देवताले राज्य लाभ गरेकोछ। अन्तरवेदीमा वस्ने भ्रष्टनाम भएका ब्राह्मण फाल्गुण कृष्ण अमावश्यामा यी देवताको दर्शननगरि रात्रीमा मृत्यु हुनाले मुक्त भै शिवपुरी गएकोछ। विरुपाक्षले माघ कृष्ण चतुर्दशीका दिनमा दर्शन पूजन गर्दा कुष्टादिरोग देखि मुक्त भएको छ। योजगा चित्रकूट पर्वतमा कुल पीठ कहलाउँछ।

(२) **श्री भीमेश्वर शिवलिङ्ग** पूर्व २ दोलखामा:-यो स्थान आदि लिङ्ग देखि तिन योजन उत्तर पर्दछ। यहाँ देखि नैऋत्य कोणमा स्वर्ण कौशिकी र ताम्र कौशिकीको संगममा देवतीर्थ वेणिघाट छ। यी देवता शुंभासुर दैत्यका भयले भागेका देवताहरूले ध्यान गर्दा उत्पन्नभै दैत्यको नाशगरि देवताको राज्य लाभ गरेको छ। यस तीर्थमा स्नान र यी देवताको पूजा गर्नाले श्राद्धको दिनमा बारबार खाएका पापले सूकरयोनिमा प्राप्त भएका रुद्रशर्मा ब्राह्मण माघ कृष्ण चतुर्दशिमा दर्शन पूजन गर्नाले मुक्त भएको छ। विरूपाक्षले माघ शुक्ल पूर्णिमामा दर्शन पूजन गरेको हो। योजगा ताम्रचूड पर्वत कहलाउँछ। यहाँ देखि १ कोश

पर उत्तर ताम्र कौशिका र ढोलती नदीको संगममा नागह्रद तीर्थ र त्यस देखि उत्तर त्रिपुरा सुन्दरीदेवीको (प्रसिद्ध पीठ) दर्शन बाराणसी धाराको स्नान, उत्तम मानिएको छ ।

(३) कार्फेश्वर शिवलिङ्ग पूर्व १ नं घाढविसेमा:— यो स्थान भिमेश्वर देखि तिन योजन पश्चिम पर्दछ । यी देवता देखि शयधनु पश्चिम तर्फमा स्वर्ण कौशिकी नदी र शैलवती (भोटेकोशी) को संगममा स्वर्णतीर्थ छ । यी देवता कार्फि मुनिले ध्यान गर्दा उत्पन्न भै दर्शन दिनु भएको हो । कुरूपा नाम गरेका म्लेच्छकी स्त्री फाल्गुण कृष्ण आमावाश्यामा यस तीर्थमा स्नान र शिवलिंगको दर्शन गर्नाले मुक्त भएकी हुन् । विरूपाक्षले माघ कृष्ण २ का दिनमा दर्शन पूजन गरेको हो । यो जग्गा ककुदाद्रि पर्वत कहलाउछ ।

(४) श्रीकाश्यपेश्वर शिवलिङ्ग पूर्व १ नं सन्दनमा:–यो स्थान कार्फेश्वर देखि तिन योजन पश्चिममा पर्दछ । २०० हात पूर्वमा गौरी कुण्ड र १०० हात पश्चिनमा सरस्वती कुण्ड कश्यपले स्नान गरेको काश्यप तीर्थ छ । यी देवताले काश्यप ऋषिले सृष्टि गर्नको इच्छाले ध्यान गर्दा उत्पन्नभै दर्शन दिइ इच्छापूर्ण गरिदिनु भएको हो । नपुंसकले आषाढ कृष्ण ८ मा यस तीर्थमा स्नान र यी देवताको दर्शन गरी मुक्तभै राज्यभोग गरि शिवपुरी प्राप्त गरेको छ । विरूपाक्षले माघ कृष्ण ३ का दिनमा दर्शन पूजन गरेको हो, यो जग्गा ककुदाद्रि पर्वत कहलाउँछ ।

(५) श्रीस्फटिकेश्वर शिवलिङ्ग पूर्व १ नं स्फटिकसिलामा:— यो स्थान काश्यपेश्वर देखि एक योजन उत्तरमा पर्दछ । १००

घनु ईशानमा चन्द्रकान्ती नदी (जर्धे) र हिमश्रवा सिन्ध नदीको संगममा—कान्ति तीर्थ छ ई देवता ब्रह्माजीले ध्यान गर्दा उत्पन्न भै दर्शन दिनु भएको हो। धर्मदास नाम भएका ब्राह्मण आश्विन शुक्ल पूर्णिमामा एस तीर्थमा स्नान र ई देवताको दर्शनगरि रात्रीमा मर्नाले मुक्त भयाका छन्। विरूपाक्षले माघ कृष्ण ४ का दिनमा दर्शन पूजन गरेको हो। यो जग्गा काकन्द पर्वत कहलाउछ ॥

(६) श्री चण्डेस्वर शिवलिङ्ग पूर्व १ नं वनेपामा:-यो स्थान स्फटिकेस्वर देखि दुई कोश पश्चिममा पर्दछ। ई देवता देखि दुई पाउ दक्षिणमा रूद्रवती (चण्डेश्वरी) र रुद्रवती (पुण्यमाता) को संगममा ऊग्र तीर्थ छ। ई देवताले च्यवन ऋषिले ध्यान गर्दा उत्पन्न भै दर्शन दिनु भएको हो। चण्ड नाम गरेका दैत्यले चैत्र शुक्ल नवमीमा यस तीर्थमा स्नान र ई देवताको दर्शन गर्नाले स्वर्गादि सकल लोकलाई जीती भोग गरि पछि वहाके कृपाले देवीबाट मृत्यु पाइ मुक्त भयाको छ। विरूपाक्षले माघ कृष्ण ५ मा दर्शन पूजन गरेको हो। यो जग्गा स्कंदगिरि कहलाउछ।

७ श्री धनेस्वर शिवलिङ्ग पूर्व १ नं बनेपामा:-यो स्थान चण्डेश्वर देखि १ कोश दक्षिण पर्दछ। ई देवता देखि एक पाउ उत्तरमा सोहि (चण्डेस्वर नजिकको) उग्र तीर्थ छ। ई देवता भृगु ऋषिले ध्यान गर्दा उत्पन्न भै दर्शन दिनु भएको हो। क्रतु ऋषिको उपदेशले शिवदास नाम भयाको वैश्य वैशाख कृष्ण चतुर्दशीमा ई देवताको दर्शन पूजन गर्नाले प्रशस्त सम्पत्ति पाई पछि मुक्त भयाको छ। विरूपाक्षले मार्ग कृष्ण ६ का दिनमा दर्शन पूजन गरेको हो। यो जग्गा रौद्रगिरि पर्वत कहलाउछ।

८ **श्री बिकटेस्वर शिव लिंग** भक्तपुर साँगामा:— यो स्थान धनेस्वर देखि ६०८० धनु पश्चिम पर्दछ। ई देबता देखि २५ हात पूर्वमा ३ नदीका संगममा (अगनौल, च्याहानडोल, फलैचाडोल, साँगादेखि पूर्व रातमाटे देखि पश्चीम) पुष्प तीर्थ छ ई देवता, पुष्प तीर्थको जलपान गर्नाले, व्याधाको वृत्ति भै रहेको विकट नाम भयाको म्लेछ ज्ञानबाट बिरक्त भै ध्यान गर्दा उत्पन्न भै दर्शन दिनु भयाको हो एसै बिकट नाम भयाका म्लेछले माघ कृष्ण ३ मा ई देवताको दर्शन पूजन गर्नाले मुक्त भयाको छ विरूपाक्षले माघ कृष्ण ७ का दिनमा दर्शन पूजन गरेको हो यो जग्गा द्रोणाचल पर्वत कहलाउछ।

